प्रवेश सं० ———

विषय: धर्मशास्त्रम्

क्रम सं० ———

नाम दानविवेक:

ग्रन्थकार भानुदीक्षित:
(भट्टोजिदीक्षित सूनु:)

13689

पत्र सं० १-३६

श्लोक सं० ———

अक्षर सं० (पंक्तौ) ३८

पंक्ति सं० (पृष्ठे) ११

आकार: १०" x ४.८"

लिपि: दे. ना.

आधार: का.

वि० विवरणम् पू०

ओ० ७३२६

पी० एम० यू० पी०—७८ एस० सी० ई०—१८५१—५०.०००

Indira Gandhi National
Centre for the Arts

दानलक्षणं,
पात्रलक्षणं,
१ ब्राह्मणलक्षणं दि
अग्न्याधिदानं
दानकालः
पुण्यदेशाः
तीर्थप्रतिग्रह
निषेधः
आपद्दितीर्थे
ग्राह्यं
२ दानस्तुतं
प्रतिग्रहीतकृत्सं
द्रव्यमानं
धान्यमान्य
[illegible]दक्षिणा
द्रव्यदेवता,

४ प्रतिग्रहविधिः
दशमहादानानि
सुवर्णदानं
रजतदानं
अश्वदानं
[redacted]भीः
अश्वाश्वदानं
५ तिलदानं
६ नित्यतिलपात्रं
महातिलपात्रं
पूर्णकांस्यपात्रदा
७ तिलवृषदानं
गजदानं
८ दासीदानं
रथदानं
गोत्रीदानं
शिबिकादानं

९ महीदानं
गृहदानं
१० मठदानं
प्रतिश्रयदानं
कन्यादानं
१२ कपिलादानं
दशधेनु
१३ गुडधेनु
१४ घृततिलधेनु
जलधेनु २४
१५ क्षीरधेनु
मधुधेनु २५
शर्कराधेनु
१६ पंचरत्नानि
दधिधेनु
रसधेनु
स्वरूपतोगोदानं

१७ हेमश्रृंगी
कार्पासधेनु
लवणधेनु
सुवर्णधेनु
१८ वंध्यात्वहर
उभयतोमुखी
१९ [illegible]
तैतली
महीषि
२० महीदानं
अजादानं
महिषदानं
म[illegible]नं
२१ अचलदानं
धान्यादिमेरु
साधारणनियमः
२३ लवणाचलः

२४ [illegible]पर्वतदानं
सुवर्णाचल
तिलाचलः
२५ मेरोर्द्दीपेतिल
पर्वतदानं
कार्पासाचलः
घृताचलः
२६ रत्नाचलः
रौप्याचलः
शर्कराचलः
२७ शिखरदानं
स्थलदानं
२८ धन[illegible]दमूर्ति
शालग्राम
कालपुरूष
२९ कालचक्र

[illegible]पत्वरु
कृष्णाजिन
३० शय्यादानं
३१ वस्त्रदानं
पात्र
स्थाली
पुराणानि
छत्री
अन्नं
तीर्थ
गर्भतिका
प्रपादानं
३२ अग्नी
दीप
दीपप्रचार
गोपरिचर्या
धर्मघटदा

३२ यज्ञोप
मासदानानि
३३ अधिमास
संक्रांतिदानानि
ग्रहदान
३४ नानाधान्या
देमीत्राः
नाप्रकाराः
तैदुआः
गोधूमाः
मुद्गाः
माषाः
चणकमंत्र
कुलत्थमंत्र
तिलमंत्रः
सुवर्णतिल
दक्षिणतिलपात्र
अन्नदान
३५

Indira Gandhi National Centre for the Arts

दान॰ ॥श्रीगणेशायनमः॥ अथसंक्षेपेणदानान्युच्यंते॥ परस्वत्वोत्पत्त्यंतोद्रव्यत्यागोदानं॥ देवलः॥
१ अर्थानामुदितेपात्रेश्रद्धयाप्रतिपादनं। दानमित्यभिनिर्दिष्टंव्याख्यानंतस्यकथ्यते। तच्चेदंत्रि
धा। कृगीतासु। दातव्यमितियद्दानंदीयतेऽनुपकारिणे। देशेकालेचपात्रेचतद्दानंसात्विकंस्मृ
तं॥ यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः॥ दीयतेचपरिक्लिष्टंतद्राजसमुदाहृतं। अदेशकालेय
द्दानमपात्रेभ्यःप्रदीयते। असत्कृतमवज्ञातंतत्तामसमुदाहृतं॥ गारुडे॥ अर्हतेयत्स्ववर्णादि
नेयत्कायिकंमतं। आर्त्तानामभयंदद्यात्स्यतद्देवाचिकंस्मृतं। विद्यादानेनयज्ञाप्यस्तद्दानं
मानसंद्विजाइति॥ अथपात्रं॥ याज्ञवल्क्यः॥ नविद्ययाकेवलयातपसावापिपात्रता॥ यत्र
वृत्तमिमेचोभेतद्धिपात्रंप्रचक्षतेइति॥ व्यासः॥ प्रथमंतुगुरोर्दानंदद्यात्ज्येष्ठमनुक्रमात्॥ ततो
न्येषांतुविप्राणांतदद्यात्पात्रानुरूपतः॥ भविष्ये॥ संनिधानस्थितान्विप्रान्द्दौहित्रंविट्पतिंतथा॥
भागिनेयंविशेषेणतथाबंधून्गृहागतान्। नातिक्रामेन्नरस्त्वेनान्सुमूर्खानपियोपते। अति दान॰
क्रम्यमहारौद्रंरौरवंनरकंव्रजेत्। दक्षः॥ सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे॥ सहस्रगुणमा १

चार्येत्वनंतंवेदपारगे॥ अब्राह्मणलक्षणमाह॥ व्यासः॥ ब्रह्मबीजसमुत्पन्नोमंत्रसंस्कारवर्जितः
॥ जातिमात्रोपजीवीचभवेदब्राह्मणःसतु। ब्राह्मणब्रुवलक्षणमाह। गर्भाधानादिभिर्युक्तस्तथो
पनयनेनच। नकर्मविन्नचाधीतेसभवेद्ब्राह्मणब्रुवः। द्रव्यविभागः॥ शिवधर्मे। तस्मात्त्रिभागं
वित्तस्यजीवनायप्रकल्पयेत्। भागद्वयंतुधर्मार्थंअनित्यंजीवितंयतः। वित्तस्यभागपंचकंकृत्वा
भागत्रयंजीवनार्थंभागद्वयंदानार्थमितिहेमाद्रिः॥ अथअयाह्यंदानंस्कांदे॥ अजिनंमृतश
य्यांचमेषीचोभयतोमुखीं। कुरुक्षेत्रेचयद्दानंनोनभव्यःपुरुषोभवेत्। मनुः॥ हिरण्यंभूमिमश्वंगा
मन्नंवासस्तिलान्घृतं। अविद्वान्प्रतिगृह्णानोभस्मीभवतिदारुवत्। अविद्वान्नामविद्यातपो
भ्यांहीनेननग्राह्यमितिभावः॥ अथदानकालः॥ बाराहे। दर्शेशतगुणंदानंतच्चतुर्घ्नंदिनक्षये। शत
घ्नंतच्चसंक्रांतौशतघ्नंविषुवेततः। युगादौतच्छतगुणंअयनेतच्चताहतं। सोमग्रहेतच्छतघ्नंतच्छत
घ्नंरविग्रहे। तच्छतघ्नंव्यतीपातेदानंवेदविदोविदुः॥ ॥विष्णुधर्मोत्तरे॥ वैशाखीकार्त्तिकीमाघी
पूर्णिमातुमहाफला॥ पौर्णमासीषुसर्वासुयासर्क्षसहितासुच॥ दत्तानामिहदानानांफलंशतगु

Indira Gandhi National
Centre for the Arts.

दान० णं भवेदिति॥ अथ पुण्यदेशाः। मनुः। दृषद्वती सरस्वत्योर्देवनद्योर्यदंतरं॥ तं देवब्रह्मनिर्मितं देशं
२ ब्रह्मावर्तं प्रचक्षतेति॥ भविष्ये। वाराणसी गुरुक्षेत्रं प्रयागं पुष्करं तथा॥ महाकालं तथा गंगामेतो पु
ण्यतमा विदुः॥ गोकर्णं नैमिषारण्यं सेतुं श्रीपर्वतं तथा॥ पाद्मे॥ लिंगं वा प्रतिमां वापि दृश्यते यत्र कु
त्रचित्॥ तत्सर्वं पुण्यतां याति दानं पुण्यं महाफलं॥ एतेषु दानमतिप्रशस्तं। नारदः। पुण्यदेशेषु सर्वेषु
गृहे देवालयादिषु। यत्र साधनसंपत्तिस्तत्र दानं प्रचक्षते। अथ तीर्थप्रतिग्रहनिषेधः। पाद्मे। न ती
र्थे प्रतिगृह्णीयात्प्राणैः कंठगतैरपि ति। तीर्थक्षेत्रं तीराद्गव्यूतिमात्रं तु परितः क्षेत्रमुच्यते ति॥ गंगा
यां तु क्षेत्रेपि न ग्राह्यमित्यर्थः॥ ब्रह्मपुराणे। प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं। तत्र नारायण
स्वामी नान्यस्वामी कदाचन। तत्र न प्रतिगृह्णीयात्प्राणैः कंठगतैरपीति। प्रयोगगर्भः॥ दानधर्मे। भा
द्रकृष्णचतुर्दश्यां यावदाक्रमते जलं। तावद्गर्भं विजानीयात्तदूर्ध्वं तीरमुच्यते ति। गर्भप्रतिग्रहनिषेधः
प्रसिद्धनदीषु। गंडक्यादिषु तीरेपि निषेधः। तदुक्तं। गंडक्यादिषु तीरेपि न ग्राह्यं भक्तिमिच्छता इति दान०
वचनात्॥ आपदि तीर्थेपि ग्राह्यं॥ अथ चेत्प्रतिगृह्णीयाद्ब्राह्मणो वृत्तिकर्षितः। दशांशमर्जितं दद्या २

द्देवं धर्मो न हीयते ति पद्मपुराणवचनात्॥ अथ दानक्रमः॥ कात्यायनः॥ कुशोपरि निविष्टेन तथा
चैवोपवीतिना॥ देयं प्रतिगृहीतव्यमन्यथा विफलं भवेत्॥ स्मृत्यंतरे। दद्यात्पूर्वमुखो दानं गृह्णीया
दुत्तरामुखः। आयुर्विवर्धते दातुर्ग्रहीतुर्हीयते न तदिति। नारदीये। मनसा पात्रमुद्दिश्य जलं
मध्ये जले क्षिपेत्। दाता तु शतगुणं पुण्यं प्रतिग्राही न दोषभाक्। अथ प्रतिग्रहीतृकृत्यं। ॐकारमुच्चा
र्य ब्राह्मणो द्रविणं सकुशोदकं। गृह्णीयाद्दक्षिणे हस्ते तदंते स्वस्ति कीर्तयेत्। आदित्यपुराणे। सोंकारं
ब्राह्मणे प्रोक्तं निरोंकारं महीपतौ। उपांशु च तथा वैश्ये मनसा शूद्रजे तथेति। ॐ स्वस्तीति यथाक्र
मं पठेत्। अथ द्रव्यमानं॥ सुवर्णमानं। याज्ञवल्क्यः। जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं। तेऽष्टौ
लिक्षास्तु तास्तिस्रो राजसर्षप उच्यते। गौरस्तु तत्त्रयः षट् ते यवो मध्यश्च ते त्रयः॥ मतो रो गौरसर्षपपट्
ति। कृष्णलः पंच ते माषास्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं॥ रजतमा
ने॥ द्विकृष्णलो रूप्यमाषो धरणं षोडशैव ते। शतमानं तु दशभिर्धरणैः पलमेव तु। निष्कः सुवर्णा
श्चत्वार इति॥ ताम्रपलमाह॥ कार्षिकस्ताम्रिकः पण इति। पलचतुर्थांशेन कर्षेणोन्मितः कार्षि

Indira Gandhi National
Centre for the Arts

दान० कस्मात्संबंधीपणो भवति। देशभेदेन कार्षापणो भिन्न इत्याह। कार्षापणो दक्षिणस्यां दिशि रौप्यः
२ प्रवर्त्तते। पणैर्निबद्धः पूर्वस्यां षोडशैव पणाः स तु। षोडशपणा अष्टौ च कोः कार्षापणः पूर्वस्यामि
त्यर्थः॥ तावता ल अं रूप्यं दक्षिणा स्यः॥ अथ धान्यमानं॥ भविष्यपुराणे। पलद्वयं तु प्रसृतं द्विगुणं
कुडवं मतं। चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः। आढकैस्तैश्चतुर्भिस्तु द्रोणस्तु कथि
तो बुधैः। द्रोणैः षोडशभिः खारी विंशद्द्रोणैः स्मा कुंभ उच्यते। कुंभैस्तु दशभिर्वाहो धान्यमानं प्रकी
र्त्तितं॥ अथ दानदक्षिणामाह॥ व्यासः॥ सुवर्णं परमं दानं सुवर्णं दक्षिणा परा। सर्वेषामेव दानानां
सुवर्णं दक्षिणेष्यते। परेत्स च पुरुषाहारोपयिक तंडुलादिकमपि दक्षिणेति हेमाद्रिः॥ दद्य
द्यननां यो शंदक्षिणां परिकल्पयेत्। अनुक्ते दक्षिणे दाने दशांशं वापि शक्तितः। भविष्ये। शंपं ति
क्षशतं पार्थ दानेषु विधिरुत्तमः। मध्यमस्तु तदर्धं न तदर्धेनाधमः स्मृतः। मध्यां च कालपुरुष
तथान्येषु महत्सु च। एवं कल्पपादप १ हिरण्याश्वरथ हेमहस्तिरथे च २ ब्रह्मांड ३ सुवर्णकामधे दान० 
नोः ५ कृष्णाजिनस्य च॥ अशक्तस्यापि कृष्णो यं पंच सौवर्णको विधिः। द्रव्यदेवता विष्णुधर्मे। २

अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता। कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः। आग्ने
यं च तथा छागं वारुणो मेष उच्यते। कुंभं च करकं चैव वरुणं निर्निबोधत। आग्नेयं कनकं प्रो
क्तं वायव्याः पक्षिणस्तथा। पुत्रं कृष्णाजिनं शय्या रथमासनमेव च। उपानहौ च यानं च पद्मन्य
स्माणं वर्जितं। तत्तु चांगिरसत्वं तु सर्ववैविष्णुदेवतं। पुस्तकादीनि सर्वाणि विद्यात्सारस्वता
नि वै। इति प्रतिग्रहविधिर्विष्णुधर्मे। इमां प्रतिगृह्णीयान्मूलमन्त्र स्तु करो द्विजः। परिशिष्टे प्रति
गृह्णीत गां पुच्छे कर्णे वा हस्तिनं करे। मूर्ध्नि दासीमजं चैवं पृष्ठे अन्तर गर्दभो। अश्वं कर्णे सटे वा
पि अन्नमुद्दिश्य धारयेत्। शय्यासनगृहं क्षेत्रं संस्पृश्य पादपं कांचनं। छत्रं च चामरं मूलेपकं
संगृह्य गौरवात्। गृह्णोपानहौ मंत्रं वाचयेत्प्रति मुच्यते। वासस्तथा समादाय कन्यां शीर्षेत
था करे। पुत्रमुत्संगमारोप्य रथं च पुरस्तथेति। अथ दश महादानानि। कौर्मे। कनका
श्व तिला नागा दासी गृह — महारथाः। कन्या च कपिला धेनुर्महादानानि वै दश। तत्र प्र
थमं सुवर्णदानं। दत्वा सुवर्णस्य शतं विप्रेभ्यः श्रद्धयान्वितः। ब्रह्मलोकमनु प्राप्य ब्रह्म

Indira Gandhi National
Centre for the Arts

४ णा सह मोदते। गंधेन भस्मिश्र कृता जलेन आलिप्य मध्ये सित तंदुलेश्च। सरोरुहं केसरभूषणाढ्यं
सकर्णिकं चाष्टदलं विलिख्य। तस्मिन्हिरण्यं शतमानमात्रं निधाय तस्योपरि तं विचिंत्ये
ति। तत्र ब्राह्मणं कमलासनस्थं विप्रं च संपूज्य देयद्रमरतीयांश दक्षिणासहितं हिरण्यगर्भ
गर्भ। स्थामिति मंत्रेण दद्यात्। स्कांदे। यः प्रयच्छति विप्राय रजतं वापि निर्मलं। सविध्वया सु
पापानि स्वर्गलोके महीयते। इति रजतदानं। अथाश्वदानं भारते। सर्वोपकरणोपेतं सु
नानंदोषवर्जितं। योश्वं ददाति विप्राय स्वर्गलोके महीयते। तथा। यावंति रोमाणि हये भ
वंति हि नरेश्वर। तावंतो वाजिदा लोकान्प्राप्नुवंतीह पुष्कलानिति। वाजिदान्सूर्यलोकान्।
कौर्मे। शफैः पंच शफैर्शेष्ये सुवर्णालंकृतं क्रमात्। सदक्षिणं सुवर्णं च ब्राह्मणाय निवेदयेत्
ब्राह्मणं वस्त्रादिभिरलंकारैर्गंधपुष्पादिभिरभ्यर्च्य दद्यात्। दानमंत्रः। उच्चैःश्रवा अश्वानां
राजां विजयकारक। सूर्यवाहन मस्तम्यमतः शांतिं प्रयच्छ मे। इत्यश्वदानं। गारुडे। अश्वमेध ६
मखं यत्फलं लोके तु मुनीश्वराः। अश्वदानं तु ते नेह कर्त्तव्यं विधिपूर्वकं। विधिं तस्य प्रव

क्ष्यामि ब्रह्मणा निर्मितं पुरा। श्वेतमश्वं शुभं ताहँ ते मपर्याणभूषितं। रूप्यैस्तु कटकैः शुभैः करिदं
तोपशोभितं। वज्रनेत्रं खुरैस्ताम्रैः क्षौमपुच्छं सुवाससं। शुभ्रेण पट्टकेनैव संवृतं स्वायुधान्वितं।
धान्यरत्नोपरिस्थं तु बधकच्छं सुपट्टकं। एवं सुतेजसं चाश्वं ब्राह्मणाय निवेदयेत्। मन्वादिषु यु
गाद्ययनविषुवोपरागादिषु दानं कार्यं। अश्वपूजामंत्रः। मार्तंडाय सुवेगाय कश्यपाय त्रिमूर्त्त
ये। जगद्वीजाय सूर्याय त्रिवेदाय नमोस्तु ते। एवमुच्चारयन्मंत्रं कर्णे दद्यातिजोदकं। दान
वाक्यं। अद्येत्यादि अमुकगोत्रायामुकशर्मणे ब्राह्मणायेनमश्वं सुवर्णतिलकालंकारयुतल
लाटग्रैवेयकपूर्वोक्तालंकारैर्युक्तं गंधपुष्पाद्यर्चितं सकलब्रह्महत्यादिपापनाशकामः सा
लंकृताय तुभ्यमहं संप्रददे न मम इति। ततो प्रार्थना। महार्णवे समुत्पन्न उच्चैःश्रवसपुत्र
क। मया त्वं विप्रमुख्याय दत्तो हय सुखी भवेति। विप्रप्रार्थना। इमं विप्र नमस्तेभ्यं मश्वं
ते प्रतिपादितं। प्रतिग्रहीष्यति प्रेंद्र मया दत्तं सुशोभनमिति। दानमंत्रमुच्चार्य कर्णे सम
र्पणं कृत्वा विप्रहस्ते जलं क्षिपेत्। ततः सुवर्णं दक्षिणां दद्यात्। पश्चादश्वपुरो गच्छेत्स
दानां समृसपत्तिं। भास्करं मनसि ध्यात्वा श्वालोक्य स्वगृहं व्रजेत्। श्वेतमश्वं तु यो दद्या
त्फलं दशगुणं भवेत्। एवं कृते नरव्याघ्र सूर्यलोके व्रजेन्नर इति। इति श्वेताश्वदानं।

Indira Gandhi National Centre for the Arts

शिवायाश्वमलंकृत्य यः पर्वणि निवेदयेत्। सोश्वमेधस्य यज्ञस्य फलमष्टगुणं भवेदिति
५ शिवधर्मे शिवायाश्वदानमप्युक्तं। अथ तिलदानं। आदित्यपुराणे। वैशाख्यां पौर्णमा
स्यां वा तिलान्क्षौद्रेण संयुतान्। यः प्रयच्छेद्द्विजातिभ्यः स वै पापैः प्रमुच्यते। ज्येष्ठे
मासि सिते दद्यात् पौर्णमास्यां विशेषतः। अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मा
नवः। माघे मासि तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति। सर्वसत्वसमाकीर्णं नरकं न स
पश्यतीति। विष्णुधर्मोत्तरे। तिला गावो हिरण्यं च अन्नं कन्या वसुंधरा। दत्तान्येतानि
विधिवत्तारयंति महाभयात्। जपात्। तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी। तिलभु
क्तिलदाता च षट् तिलाः पापनाशनाः। इदं तु माघमासपरं। अन्यत्र दान
मेवेति। कौर्मे। कृष्णाजिने तिलान् कृत्वा सुवर्णं मधुसर्पिषि। द्रोणैकं वा समाच्छन्नं
त्रिधा तद्रुक्मदक्षिणं। ब्राह्मणाय च नं दत्वा सर्वं तरति दुष्कृतं। अद्येत्यादि अमुक ५
गोत्राय ब्राह्मणाय

शक्त्या पूजिताय कृष्णाजिनस्थं सुवर्णमधुसर्पिर्युक्तं वस्त्राच्छन्नं तिलद्रोणं सर्वपापक्षयकाम
स्तुभ्यमहं संप्रददे। न मम। कृतैतत्तिलदानप्रतिष्ठासिध्यर्थं सुवर्णदक्षिणां तुभ्यमहं संप्रददे॥
इति तिलदानं॥ अथ नित्यतिलपात्रदानं॥ ब्राह्मे॥ ताम्रपात्रे तिलैः पूर्णे प्रस्थमात्रे द्विजाय वै॥
सहिरण्यं च यो दद्यात् प्रत्यहं श्रद्धयान्वितः॥ सर्वपापविशुद्धात्मा लभते परमां गतिं॥ अद्येत्यादि इ
दं ताम्रपात्रं तिलपूर्णं सुवर्णं अशेषपापक्षयकामः तुभ्यमहं संप्रददे न मम॥ तिलाः स्वर्णसमायुक्ता
दुरितक्षयकारकाः। विष्णुप्रीतिकरा नित्यमतः शांतिं प्रयच्छ मे॥ यानि कानि च पापानि ब्रह्महत्यासमा
नि च॥ तिलपात्रप्रदानेन तानि नश्यंतु मे सदेति प्रार्थयेत्॥ अथ महातिलपात्रदानं॥ ताम्रपात्रे तिला
न्कृत्वा पलषोडशकल्पिते। सहिरण्यस्वशक्त्या वा विप्राय प्रतिपादयेत्। नाशयेत्त्रिविधं पापं वाङ्मनः
कायसंभवं। कौर्मे॥ तिलपूर्णं ताम्रपात्रं सहिरण्यं द्विजाय वै। प्रातर्दत्वा तु विधिवत् दुःस्वप्नं विनि
हंति सः। तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं। ताम्रपात्रं दशपलं जघन्यं परिकीर्तितं। द्विगुणं
मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतं॥ स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत्। त्रिगुणं चोत्तमे तद्व

Indira Gandhi National
Centre for the Arts

ई

दान० न् सुवर्णपरिकीर्त्तितं। पलसंख्या तु निष्कद्वयपरिमिता सपादनिष्कद्वयमित्यन्ये॥ तद्देशाचारतो
६ व्यवस्था॥ दानं तु नित्यपात्रवत्॥ इति महातिलपात्रदानं॥ अथ पूर्णकांस्यपात्रदानं॥ आदित्यपुरा
णे॥ यज्ञैः सौत्रामणीं कर्त्तुं यदि शक्तिर्न विद्यते॥ महासरस्तथा वापीं कूपं कर्त्तुं च दीर्घिकां॥ एवं कृते मा
तृऋणान्मुक्तो भवति मानवः॥ सदक्षिणं कांस्यपात्रं अथ दत्वा प्रमुच्यते॥ शुद्धकांस्यस्य पात्रस्य
प्रमाणं पंचविंशतिः। पलानामत्र निर्दिष्टं पलानां प्रस्थसंसकं (?)॥ सुवर्णमाषाश्चत्वारो पात्रोप
रि विधारयेत्॥ वस्त्रेण वेष्टयेत्पात्रं प्रधानेन सभक्तितः। स्नानं कृत्वा निम्नगायां पितॄन्देवांश्च
तर्पयेत्॥ ततोभिपूजयेद्देवं शंकरं हरिमेव वा॥ गोमयेनाथ संलिप्य गृहमध्ये च सर्वतः॥ लि
खेत्पद्मं द्वादशारं कुंकुमेनाथ शोभनं। ततो वह्निं स्थापयित्वा होमं कुर्याद्यवैस्तिलैः। तत्र पात्रं
प्रतिष्ठाप्य पूजयेद्भक्तिभावतः। ततो ब्राह्मणमाहूय बहुज्ञं सुसंभृतं। पादौ प्रक्षाल्य विधि
वत्तस्मात्श्राद्धं समारभेत्॥ अथ कृत्स्नं यथाशक्ति भोज्यं वाप्यं तथा सरः (?)। ग्रहणे रविसोमाभ्यां सं दान०
क्रांतिषु युगादिषु। अथान्यदपि यद्दत्तं भोज्यामुद्दिश्य मातरं। तदक्षय्यफलं सर्वं पुरा प्राह म ६

हेश्वरः। जीवंतीं भूषयेद्वस्त्रैर्माल्यैरपि विभूषणैः। दत्वा विप्रस्य पात्रं तु होमं कुर्यात्प्रयत्नतः।
सोपस्करं सताम्बूलं क्षमाप्य च विसर्जयेत्॥ इति यजमानः पूर्वाह्णे द्वादशदलपद्मे पूर्वोक्तं
कांस्यपात्रं तिलप्रस्थसंस्थं दत्तं स्थापयित्वा हरिहरमभ्यर्च्य पुरतोग्निं विष्णुमंत्रेण शिवमं
त्रेण वाभिष्ठाप्य तत्र शतं तद्द्रव्यैर्हुत्वा ब्राह्मणमभ्यर्च्य उदङ्मुखमुपवेश्य अर्घ्याद्यैरादि ब्राह्म
णाय पूर्ववत्संपादितोपस्करादिभिः सहितं मातृऋणानृण्यकामस्तुभ्यमहं संप्रददे न ममेति मं
त्रान्तः (?) कांस्यपात्रं मया दत्तं मातुरानृण्यकाम्यया। भगवन्त्वं च नो गृह्य यथाशक्तिस्तथा वद।
दशमासांश्च उदरे जनन्यास्संस्थितस्य मे। क्लेशिता बालभावेन स्तनपानाद्द्विजोत्तम। पूयमू
त्रादिमल्लेपलिप्तायां च मया कृता। भवतो वचनादद्य मम मुक्तिर्भवेदृणात्। तिलसंख्या
कृतं दुःखं जनन्या मम सेवितं। कांस्यपात्रप्रदानेन कृतकृत्यो भवाम्यहमिति। ततः शक्त्या
हिरण्यं दद्यात्॥ पुनर्व्याहृतिभिर्होमं कृत्वा विसृज्य यथाशक्ति ब्राह्मणान्भोजयेत्॥ इति
कांस्यपात्रदानप्रयोगः॥ अथ तिलकरकदानं। वायुपुराणे॥ करकं तिलसंपूर्णं मंडले वह्नि

Indira Gandhi National
Centre for the Arts

दान० ७ रेवते। शिवं वह्निवदाराध्य पूजयेत्करवीरकैः। पूजां रक्तचंदनेन। निर्यासः सर्जरसधूपेन धू
पयेत्॥ वह्निमंडले त्रिकोणमंडलं॥ शिववह्निवदिति वह्निस्वरूपं शिवं। ब्रह्मांडे। आदर्शं
वततो दद्याद्दीपानां च चतुष्टयं। वह्निरूपपतिः शंभुर्वह्निरूपितिलाश्रयः। तेजोरूपी कृतं
पापं वाक्कायं च व्यपोहतु इति दत्तेस्य नश्यंति पापान्यग्निकृतानि च। पाककर्मेषु काष्ठेषु हिं
स्यंते यानि वह्निना। अंगारवनदाहादिसंभवानि च यानि वै। विरुद्धकरणे स्थानि रूपयागे इ
वानि च। परदारपरद्रव्यपुत्रदर्शनजानि च। हावादिदर्शनोत्थानि नेत्रदोषकृतानि च। य एवं
कुरुते दानं शिवभक्त्या यतव्रतः। शिवलोके स वै भूयः कल्पत्रयमशंकितः॥ इति तिलकर
कदानं॥ अथ गजदानं॥ कौर्मे॥ दद्याद्गजं पुराणोक्तं मूल्यं पंचशतानि च॥ वित्तानुसारात्त्रापि
कनिष्ठोत्तममध्यमं॥ स्वरूपतो गजदानमुत्तमं॥ तन्मूल्यं हेममाषशतपंचके दानं मध्यमं॥
शतत्रयं हेममाषदानमधममिति॥ रूप्यस्थूलौ के करणं स्वर्णतारा विभूषणे। सदक्षिणं वि रा म०
त्तशक्त्या दत्वा शिवपुरं व्रजेत्। स्थूणारज्जुः। तारामौक्तिकजालं गजोलंकारः॥ कौर्मे॥ य ७

ग २

स्याजालोपपन्नं वा यः प्रयच्छति दंतिनं। ब्राह्मणाय दरिद्राय स्वर्गलोके महीयते॥ अथ दान
वाक्यं॥ अद्येत्यादि सालंकृताया मुकशर्मणेमुकगोत्राय ब्राह्मणायेमं हस्तिनं रक्षारज्जु
स्थिरासनहितं कांचनमालाविकीर्णं चामरं धपुष्पालंकृतं प्रजापतिदैवतं तुभ्यमहं सं
प्रददे न ममेति करं धृत्वा दद्यात्॥ करः शुंडादंडः॥ ततः सुवर्णदक्षिणां दद्यात्॥ इति गज
दानं॥ अथ दासीदानं॥ वह्निपुराणे॥ स्थिरनक्षत्रसंयुक्ते सौम्ये सौम्यग्रहान्विते॥ दानका
लं प्रशंसंति सितः पर्वणि वा पुनः। अलंकृत्य यथा शक्त्या वासोभिर्भूषणैस्तथा॥ ब्राह्मणा
य प्रदातव्या मंत्रेणानेन शंकितः। पंचवर्षाधिका सा तु चत्वारिंशत्समावधि। दासी द्विजा
य दातव्या दासदानेप्ययं विधिरित्यादि॥ अत्र दानवाक्यं॥ अद्येत्यादि अमुकगोत्राय साल
कृताय यथाशक्त्या वर्णालंकारवतीं पुष्पाद्यर्चितां अक्षय्यसुखप्राप्तिकामस्तुभ्यमहं संप्रददे
न ममेति शिरसि हस्तं धृत्वा दद्यात्। विप्रप्रार्थना। वह्निपुराणे॥ इयं दासी मया तुभ्यं श्रीवत्स
प्रतिपादिता॥ सर्वकामकरी भोग्या यथेष्टं भज्यमस्तु ते॥ ततो सुवर्णदक्षिणां दद्यात्॥ अनु

Indira Gandhi National
Centre for the Arts

दान० गत्वा सीमायां द्विजं विसर्जयेदिति॥ ॥इति दासीदानं॥ अथ रथदानं॥ कौर्मे॥ रथं चतुर्बलीवर्दै
८ रूढं धान्यावृतं तथा। वित्तानुसारात्सर्वैश्च रथोपकरणैर्युतं। सदक्षिणं च विप्राय दत्वा शिवपु
रं व्रजेत्। अष्टादशधान्यवृतं॥ रथोपकरणानि युगयोक्त्रतोत्रवरत्रादीनि॥ दक्षिणा च त्रिंशत्
माषसुवर्णदक्षिणोत्तमा। मध्यमार्द्धा अधमा एकशतं। त्रैविध्यमिति हेमाद्रिः। दानवाक्यं॥ अद्ये
त्यादि अमुकगोत्राय शर्मणे सालंकृताय चतुर्बलीवर्दयुक्तं सोपस्करं विश्वकर्मदैवतं अक्ष
य्यस्वर्गादिसुखकामस्तुभ्यमहं संप्रददे न ममेति॥ मंत्रस्तु॥ रथाय रथनाथाय नमस्ते विश्व
कर्मणे॥ विश्वरूपाय नाथाय अरूपाय नमो नम इति॥ ॥इति रथदानं॥ अथ गंत्रीदानं॥
गंत्रीं तुरगसंयुक्तां यो ददाति द्विजातये। सर्वकामसमृद्धात्मा स राजा जायते भुवीति गारु
डोक्तेः॥ गंत्री रथविशेषः॥ सा च तुर्भिरश्वैर्गजैर्वृषैर्वा पेताभ्यां चोपेता॥ मंत्रः॥ गंत्रीमिमां प्रय
च्छामि विश्वकर्माधिदैवतां। दानेनानेन भगवान्प्रीयतां मे परः पुमानिति॥ ॥इति गंत्रीरथ दान०
दानं॥ अथ सिबिकादानं॥ मार्गशुक्लैकादश्यां माघफाल्गुनयोर्वैशाखे वा हिरण्मयं दारिम ८

[illegible]

भ्यर्च्य रात्रौ जागरणं कृत्वा प्रातः अद्येत्यादि आर्येमां शिबिकां सोपस्करां सालंकृताय वि
प्राय इष्टभोगावाप्तये तुभ्यमहं संप्रददे न ममेति॥ ततो शक्त्या सुवर्णं दद्यात्॥ इति हेमाद्रौ व
ह्निपुराणे॥ तस्य वर्षाशनैः शिबिकावाहकानां च वर्षाहैमन्तं कल्पयेत्॥ ततो विपुलभोगानं
तरं विष्णुसायुज्यमाप्नुयात्॥ इति हेमाद्रिः॥ प्रार्थना॥ शिबिका ते मया दत्ता यथाशक्त्या
विभूषिता। विष्णुलोकं प्रतिगच्छ ध्रुवो ह्युत्तं तेन मे प्रदेति॥ इति शिबिकादानं॥ अथ महीदा
नं॥ कौर्मे॥ गोचर्ममात्रं भूखंडं अधिकं वा स्वशक्तितः। त्रिधा सदक्षिणं कृत्वा दत्वा शिवपुरं
व्रजेत्॥ त्रिद्व्येकसुवर्णदक्षिणेत्यर्थः॥ बृहस्पतिः॥ अपि गोचर्ममात्रेण सम्यग्दत्तेन मानवः।
धौतपापो विशुद्धात्मा स्वर्गलोके महीयते॥ दशहस्तेन दंडेन त्रिंशद्दंडा निवर्त्तनं। त्रिभाग [illegible]
हीनं गोचर्म मानमाह प्रजापतिः॥ तथा॥ गवां शतं वृषश्चैको यत्र तिष्ठेदयंत्रितः। तद्धि गो
चर्ममात्रं तु प्राहुर्वेदविदो जनाः॥ तथा॥ षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः॥ आच्छेत्ता चा
नुमंता च तान्येव नरके वसेत्॥ तथा॥ यथा भूमिप्रदानस्य कलां नार्हंति षोडशीं॥ दानान्य

Indira Gandhi National
Centre for the Arts

दान०
२
स्यानिमे शांतिर्भूमिदानाद्भवंतिह॥ अद्येत्यादि अमुकशर्मणे गोत्राय सालंकृताय षष्टिव
र्षसहस्रपरिमितस्वर्गकामसर्वपापक्षयकामो वा इमां भूमिं तुभ्यमहं संप्रददे न मम इति सपुष्प
कुशतिलोदकं ब्राह्मणहस्ते निक्षिपेत्। ब्राह्मणसमीपस्थां भूमिं प्रदक्षिणीकृत्य दद्यात्। अ
त्र सुवर्णं दक्षिणा मता। मांडव्यवचनात्। विश्वामित्रः। ग्रामं वा नगरं वापि विप्रेभ्यो यः प्रयच्छ
ति। क्षेत्रं वा सस्यसंपन्नं सर्वपापैः प्रमुच्यते। भूमिहरणे दोषमाह विश्वामित्रः स्वदत्तां पर
दत्तां वा यो हरेत्त वसुंधरां। स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति। इति शिवधर्मे
महादानं। अथ गृहदानं॥ ॥कौर्मे॥ ॥शक्तितः सर्ववित्तेन पूर्णं गृहमपि त्रिधा। सदक्षि
णं द्विजे दत्वा ब्रह्मलोके व्रजेन्नरः। गारुडे॥ एककं दारुकं वापि मन्मयं वापि शक्तितः। सर्वोप
करणोपेतं यो दद्याद्विपुलं गृहं। ब्राह्मणाय दरिद्राय विदुषे च कुटुंबिने। सर्वकामसमायुक्तो
ब्रह्मसायुज्यमाप्नुयात्। ब्रह्मवैवर्ते॥ नगारं स्थापसराधर्मो नैव दानं गृहासरं। नान्तता दान०
दधिकं पापं न पुण्यं ब्राह्मणासरः। गृहप्रकारमाह नारदः॥ स्नानागारं दिशि प्राच्यां आग्ने २

य्यां पचनालयं॥ याम्यां शयनगेहं च नैर्ऋत्यां शस्त्रमंदिरं॥ प्रतीच्यां भोजनगृहं वायव्यां पशुमंदिरं॥
भांडागारं तूत्तरस्यां ईशान्यां देवमंदिरमिति॥ मात्स्ये। देवतापंचकं तत्र चत्वारि शस्त्रमात्रेतं पूजयि
त्वा यथान्याय्यं ततो दद्यात्कृतं गृहं। पूजयित्वा स्वयं वास्तु शांतिं कृत्वा दद्यात् स्वयं। गृहमध्ये दक्षि
णभागे पद्मं विलिख्य तदुपरि प्रस्थमात्रान्तिलान् तदुपरि शय्यां स्थापयित्वा शय्योपरि सौव
र्णनारायणप्रतिमां संपूज्य प्रतिग्रहीतारं सपत्नीकं प्रतिग्रहार्थं कृत्वा तत्करे गृहीत्वा समंगलघो
षं वक्ष्यमाणमंत्रैर्गृहं प्रवेशयेत्। तत्र मंत्राः। एह्येहि नारायण दिव्यरूप सर्वामरैर्वंदितपादप
द्म। शुभाशुभानंदशुभोमधीशालक्ष्मीयुतस्त्वं च गृहं गृहाण। नमः कौस्तुभनाथाय हिरण्यकवचा
य च। क्षीरोदार्णवसुप्ताय जगद्धात्रे नमोस्तु ते। नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः। वस
वस्य जगतो गर्भभूताय नमः। भूर्लोकप्रमुखा लोकास्तव देहे व्यवस्थिताः। नंदंति यावत्कल्पांतं
तथास्मिन्भवने गृहे। त्वत्प्रसादेन देवेश पुत्रपौत्रवतो गृहे। पंचयज्ञक्रिया युक्तो वसेदा चंद्रतारकं।
तनस्तं पूर्वस्थापितशय्यापसुदङ्मुखं तं उपविश्य। देशकालौ संकीर्त्य अमुकशर्मणे अमुकगोत्राय प

Indira Gandhi National
Centre for the Arts

दा॰म॰ स्त्रीसहितसाल्लंकृताय ब्राह्मणायेदं पक्वेष्टकादिरचितं यथोपपन्नसंपादितं। कांस्यताम्रादि
१० भाजनसर्वधान्याज्यलवणघृतगुडशर्करागोबलीवर्ददासमंचकल्पलिकावितानादिसर्वव
र्षपर्याप्तसर्वोपकरणान्वितं सदीपप्रभोद्योतं सर्वदैवतं गृहं सर्वपापक्षयपूर्वककल्पकोटि
शतावधि ब्रह्मलोकमहीयमानकामः शिलाकाष्ठपक्वेष्टकादिनिर्मितं गृहं विश्वकर्मदैव
तं तुभ्यमहं संप्रददे इति दद्यात्। प्रार्थना। इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं। तव विप्र प्रसा
देन मम मास्त्विति नवं गृहं। गृहं मम विभूत्यर्थं गृहाण त्वं द्विजोत्तम। प्रीयतां मे जगद्योनिर्वास्तुरू
पी जनार्दनेति। ततः प्रतिग्रहीता देवस्य त्वेति प्रतिगृह्य ॐ स्वस्तीत्युक्त्वा कामस्तुतिं पठेत्॥
स्वर्णसहस्रमारभ्य एकसुवर्णपर्यंतं शक्त्या दक्षिणां दद्यात्। ततः पादुकोपानहच्छत्रचामरा
दिकं वपुनर्दत्वा संपन्नं गृहोपस्करभूषणं सर्वसंपूर्णमेवास्तु॥ ॥गृहदानफलमाहमात्स्ये॥
एवं सर्वसंपन्नं पक्वेष्टकं विनिवेदयेत्॥ कल्पकोटिशतं यावद्ब्रह्मलोके महीयते। शैलजं दा दा॰म॰
रुजं वापि यो दद्याद्विधिपूर्वकं। वसेत्स्वीतार्णवे रम्ये [illegible]यणसमीपतः। मन्मयं वापि यो दद्यात् १०

हं चोपस्करान्वितं॥ पुरेषु लोकपालानां प्रतिमन्वंतरं वसेत्। विधिना प्रतिवत्सरं वास्तुपूज
नं कार्यं॥ तेन दुःखमाप्नुयादित्युक्तत्वात्प्रतिसंवत्सरं कार्यमिति॥ इति गृहदानप्रयोगः॥
॥ ॥अथ मठदानं॥ स्कांदे मठं प्रयत्नेन शयनावेदिकातृणासनादिनसंयुतं। पुण्यकाले द्विजे
भ्योथ यतिभ्यो वा निवेदयेत्॥ सर्वान्कामानवाप्नोति निष्कामो मोक्षमाप्नुयात्॥ ॥इति स्कांदोक्तं
मठदानं॥ ॥अथ प्रतिश्रयदानं चोक्तं मार्कंडेये। कुर्यात्प्रतिश्रयं गृहं पथिकानां हितावहं॥ नि
जगेहैकदेशं वा साधूनां यो निवेदयेत्॥ प्रतिश्रयो धर्मशाला॥ अक्षय्यं पुण्यमुद्दिष्टं तस्य स्व त पा ६
र्गापवर्गदं। सर्वकामसमृद्धः सो देववद्विविमोदते। भविष्ये। प्रतिश्रये सुविस्तीर्णे कारिते सज
ले धने। दीनानाथजनार्थाय वर्द्धितं नकृतं भवेत्॥ ॥इति प्रतिश्रयदानं॥ ॥अथ कन्यादानं॥
सहस्रमेव धेनूनां शतं वानडुहं समं॥ दशानडुत्समं यानं दशयानसमो हयः। दशवाजिसमो
कन्या भूमिदानं च तत्समं। तस्मात्सर्वेषु दानेषु कन्यादानं विशिष्यते॥ वह्निपुराणे॥ श्रुत्वा कन्या
प्रदानं च पितरश्च पितामहाः। विमुक्ताः सर्वपापेभ्यो ब्रह्मलोकं व्रजंति ते इति देवलः। तिस्रः कन्या

वे१

दान॰ यथान्यायं पालयित्वा निर्यु वा न पिता नरकं याति नारी चास्त्रीप्रसूयिनी। वसिष्ठः॥ हाटकक्षिति
११ गोरीणां सप्तजन्मानुगं फलं। धर्मेण विधिना दातुमसगोत्रोपि युज्यते॥ ऋष्यशृंगः॥ वरगोत्रंस
मुच्चार्य प्रपितामहपूर्वकं॥ नामसंकीर्त्तयेद्विद्वान्कन्यायाश्चैवमेव हि॥ तिष्ठेत्पूर्वमुखो दाता वरः
पूर्वमुखो भवेत्॥ मधुपर्कार्चितायै तां तस्माद्द्यात्सदक्षिणां। रुद्रपात्रेण दारगस्य मंत्रेणानेन दा
पयेत्। गौरीकन्यामिमां विप्र यथाशक्ति विभूषितां। गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय। भ
मिं गो वत्स दासीं च वासांसि च स्वशक्तितः। महिषो वाजिनश्चैव दद्यात्स्वर्णमणीनपि॥ ततः स्वग
ह्यविधिना होमाद्यं कर्म कारयेत्। यथाचारं विधेयानि मंगल्यकुतुकानि च। प्रयोगश्च। वरं मधु
पर्केण संपूज्य देशकालौ स्मृत्वा· मम समस्तपितॄणां निरति· कन्यादानकल्पोक्तफलावाप्तये· अने कं५
नवरेण· श्रीलक्ष्मीनारायणप्रीतये। ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये॥ इति संकल्प्य।
कन्यां कनकसंपन्नां· दास्यामि· विश्वंभरः इमां कन्यां· पठित्वा· वरस्य गोत्रप्रवरमुच्चार्य अमु
कस्य प्रपौत्र· पौत्र पुत्र अमुकशर्मणे सर्वत्र चतुर्थ्यंतमुच्चार्य· श्रीधररूपिणे· कन्यापक्षे च तथैव दान॰
द्वितीयांतमुच्चार्य श्रीधररूपिणीं तुभ्यमहं सं॰ इति वरहस्ते सकुशाक्षतजलं क्षिपेत्। वरस्तद ११

वस्त्वेति· प्रतिगृह्य स्वस्ती स्कन्धका कामस्तुतिं पठेत्। एवमेवेत्यादिना संप्रददे इत्यनेन वाक्येन
त्रिर्दद्यात्। कन्यादानप्रतिष्ठार्थं सुवर्णं भूमिशय्यादिकं दद्यात्॥ विस्तरस्तु प्रयोगादौ ज्ञेयः॥ ॥
इति कन्यादानं॥ ॥अथ कपिलादानं॥ ॥आदित्यपुराणे॥ सहस्रं यो गवां दद्यात्कपिलां वापि सु
व्रतं॥ सममेव पुरा प्राह ब्रह्मा ब्रह्मविदां वर॥ रुक्मशृंगीं रौप्यखुरां सवस्त्रां कांस्यदोहिनीं सवत्सां
कपिलां दत्त्वा वंशान्सप्त समुद्धरेत्। यावंति चास्या रोमाणि सवत्साया भवंति हि। सुरभिलोकमा
साद्य रमते तावतीः समाः। अद्येत्यादि गोसहस्रफलावाप्त्यनंतर सवत्सकपिलारोममितवर्ष
पर्यंतं कामधेनुलोकनिवासकाम इमां कपिलां सुवर्णशृंगाद्युपस्कारयुतां अमुकगोत्राया
मुकशर्मणे सालंकृताय तुभ्यमहं संप्रददे न ममेति दद्यात्॥ मंत्रस्तु॥ मात्स्ये॥ कपिले सर्वभूता
नां पूजनीयासि रोहिणी॥ तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छ मे॥ मात्रां ते प्रदक्षिणीं कुर्यात्॥
वस्त्रैस्तु त्रिगुणं दत्त्वा दक्षिणां च चतुर्गुणां॥ एतैरलंकृतां धेनुं घंटाभरणभूषितां॥ कपिलां विप्र
मुख्याय दत्त्वा मोक्षमवाप्नुयात्॥ द्विगुणोपस्करोपेतां महती कपिला स्मृता॥ उपस्काराः सुवर्ण

Indira Gandhi National
Centre for the Arts

१२ शृंगवस्त्रदोहनपात्राद्यासामान्यगोदानेवक्ष्यमाणा॥दत्तासाविप्रमुख्यायस्वर्गमोक्षफलप्रदा।
सप्तजन्मकृतात्पापान्मुच्यतेदशसंयुता।यांयांप्रार्थयतेकामांस्तांस्तान्प्राप्नोतिमानवः॥अ
द्येत्यादिसप्तजन्मकृतपापनाशपूर्वकस्वर्गकामोमोक्षकामःपुत्रकामःशुभकामईश्वरप्रीति
कामयथाकामफलमुद्दिश्यद्विगुणोपस्कारोपेतांदद्यादिति॥ ॥इतिमहाकपिलादानं॥ ॥इति
दशदानानि॥दशधेनवोमात्स्ये॥यास्ताःपापविनाशिन्यःकथितादशधेनवः।तासांस्वरूपंवक्ष्या
मिनामानिचनराधिप।प्रथमागुडधेनुःस्याद्घृतधेनुस्तथापरा।तिलधेनुस्तृतीयातुचतुर्थी
जलसंज्ञिता।क्षीरधेनुस्तुविख्यातामधुधेनुस्तथापरा।सप्तमीशर्कराधेनुर्दधिधेनुस्तथाष्टमी
॥रसधेनुस्तुनवमीदशमीस्यात्स्वरूपतः।कुंभाःस्युर्द्रवधेनूनामितरासांतुराशयः।सुवर्णधेनु
मप्यत्रकेचिदिच्छंतिमानवाः।नवमीतिलतैलेनतथान्येपिमहर्षयः।रसधेनुस्थानेसुवर्णधेनुस्ति
लतैलधेनुश्च॥ ॥एतद्विधानमपिमात्स्ये॥कृष्णाजिनंचतुर्हस्तंप्राग्ग्रीवंविन्यसेद्भुवि॥गोमयेनो राम.
पलिप्तायांदर्भानास्तीर्यसर्वतः।लघ्वेणकाजिनंतद्वद्वत्सस्यपरिकल्पयेत्।लघुकृष्णाजिनं॥प्रा १२

ङ्मुखींकल्पयेद्धेनुमुदक्पादांसवत्सकां।प्राङ्मुखींप्राक्शिरसांसवत्सां·उत्तरभागस्थितवत्स
सहितां॥उत्तमागुडधेनुःस्यात्सदाभारचतुष्टयं।वत्संभारेणकुर्वीतभाराभ्यांमध्यमास्मृता॥अर्द्ध
भारेणवत्सःस्यात्कनिष्ठाभारकेणतु॥चतुर्थांशेनवत्सास्यात्गृहविज्ञानुसारतः॥भारःपलसहस्रात्म
कइतिपरिभाषायां॥धेनुवत्सौघृतस्येतौसितसूक्ष्मांबरावृतौ।शुक्तिकर्णाविक्षुपादौशुचिमुक्ताफ
लेक्षणौ।सितसूत्रशिरालौतौसितकंबलकंबलौ॥ताम्रगडुकपृष्ठौतौसितचामररोमकौ॥कंबुसदे
शोगडुकइति॥विद्रुमभ्रूयुगोपेतौनवनीतस्तनान्वितौ॥क्षौमपुच्छौकांस्यदोहाविंद्रनीलकतारकौ
॥सुवर्णशृंगाभरणौराजतक्षुरसंयुतौ।नानाफलमयैर्दंतैर्घ्राणगंधकरंडकौ॥गंधकरंडकःकर्पूरा
दिपात्रविशेषः।एवंरचिलाधूपदीपादिभिरर्चयेत्।वस्त्रयुग्मादीनिसारतोमानतश्चाधिक्यंफ
लाधिक्यं॥अथप्रयोगः॥अद्येत्यादिसर्वपापक्षयकामगुडधेन्वादिदानंकरिष्यइतिसंकल्प्या।
विप्रंसंपूज्यसवत्सांधेनुंसंपूज्यप्रदक्षिणीकृत्यअद्येत्यादिसर्वपापक्षयकामइमांधेनुंगोत्राया
मुकशर्मणेविप्रायतुभ्यमहंसंप्रददेनममेतिदद्यात्॥विप्रेणपुच्छेप्रतिगृह्यस्वस्तीत्युक्ते

Indira Gandhi National
Centre for the Arts

१३ मस्कृतिं पठेत्॥ ततो सुवर्णं दक्षिणां दद्यात्॥ प्रार्थना॥ या लक्ष्मी सर्वभूतानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी अतः शांतिं प्रयच्छ मे। देहस्था या च रुद्राणी शंकरस्य सदा प्रिया॥ धेनुरूपेण
सा देवि मम पापं व्यपोहतु॥ विष्णोर्वक्षसि या लक्ष्मी स्वाहा या च विभावसोः। चंद्रार्कशक्रशक्तिर्या धे
नुरूपास्तु मे प्रिये। चतुर्मुखस्य या लक्ष्मी या लक्ष्मी धनदस्य च। लक्ष्मीर्या लोकपालानां सा धेनुर्व
रदास्तु मे॥ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां तथा॥ सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ
मे॥ एवमामंत्र्य तां धेनुं ब्राह्मणाय निवेदयेत्। एतदेव विधानं सर्वासां धेनूनां प्रत्यक्षधेनुव्यति
रिक्तानामित्यर्थः। उक्तैरवनास्यास्तत्रानुपयोगात्। ततो भूयसीं दक्षिणां दत्वा ब्राह्मणान्भोज प४
येदिति। एतदेव विधानं स्यात् त एवोपस्कराः स्मृताः। अन्नं विषुवे पुण्ये व्यतीपाते तथा पुनः। गुड तीलधेनु
धेन्वादयः सर्वा उपरागादिपर्वसु॥ यथाग्रे रुद्रप्रदत्तव्या भुक्तिमुक्तिफलप्रदा। अत्र प्रमाणं द्रो राम०
णमिता धेनुरुक्ता कल्पनरैः। तत्प्रकारांतरं विष्णुधर्मे। अनुलिप्तमहीपृष्ठे वस्त्राजिनकुशावृ २२
ते॥ धेनुं तिलमयीं कृत्वा सर्वरत्नैरलंकृतां। धेनुं द्रोणेन कुर्वीत आढकेन तु वत्सकं॥ स्वर्णशृं

श्री ३

गीरौप्यखुरां गंधघ्राणवतीं तथा। कुर्याच्च शर्कराजिह्वां गुडश्यामविकंबलां॥ इक्षुपादां ता
म्रपृष्ठीं मुक्ताविमुक्ताफलेक्षणां॥ प्रशस्तपत्रश्रवणां फलदंतमयीं शुभां। स्रग्दामपुच्छां कुर्वी
त नवनीतस्तनान्वितां॥ सितसूत्रशिरालां च सितसर्षपरोमिकां॥ फलैर्मनोहरैर्भक्ष्यैर्मणिमु
क्ताफलान्वितां॥ सितवस्त्रयुगच्छन्नां घंटाभरणभूषितां। ईदृक् संस्थानसंपन्नां कृत्वा श्र
द्धासमन्वितः॥ कांस्योपदोहनां दद्यात्केशवः प्रीयतामिति। इति कर्तव्यता मंत्रास्तु गुडधे
नुक्ता एव। प्रार्थना। वह्निपुराणे। तिलाश्च पितृदैवत्या निर्मिता ब्रह्मणोसवे। ब्रह्मणा तन्म
यीं धेनुं दत्तां प्रीणातु केशवमिति मंत्रांतरं॥ ॥ इति धेनुदानं॥ अथ घृतधेनुदानं॥ ॥ ति४
विष्णुधर्मे॥ तिलाभावे तथा दद्यात् घृतधेनुं प्रयत्नतः। वासुदेवं जगन्नाथं घृतक्षीराभि
षेचनात्। संपूज्य पूर्ववत्पुष्पैर्गंधधूपादिभिर्नरैः। विधानमाह। गव्यस्य सर्पिषः कुंभं
पुष्पमालादिभूषितं। कांस्यापिधानसंयुक्तं सितवस्त्रयुगेन वा। हिरण्यसहितं तद्व

Indira Gandhi National Centre for the Arts

दान॰
१४

न्मलिविद्रुममौक्तिकैः॥ अत्रपलसहस्रपरिमाणंकुंभः। द्वादशपलाधिकपंचशतपलाधिकोवा।
इक्षुयष्टिमयान्यादान्खुरान्रौप्यमयांस्तथा॥ सौवर्णेवाक्षिणीकुर्यात्शृंगेचागरुकाष्ठजेसप्त
धान्यमयेपार्श्वेपत्रोर्णेनच्चकंबलं॥ पत्तोर्णधौतकौशेयं। कर्पूरघ्राणं। फलमयान्स्तनान्। शर्क
रयाजिह्वां। गुडक्षीरमयंमुखं। पुच्छंक्षौमं। सितसर्षपैःरोमाणि। ताम्रपृष्ठी। एतादृशींकृत्वाविधि
नासंपूज्यतथाब्राह्मणंसंपूज्यदद्यात्। विधिस्तुप्राग्वत्। मंत्रस्तुस्कांदे। घृतंगावःप्रसूयंतेघृतं
भूम्यांप्रतिष्ठितं। घृतमग्निश्चदेवाश्चघृतंमेसंप्रदीयतामिति। फलंच॥ घृतक्षीरवहानद्योय
त्रपायसकर्दमाः। तेषुलोकेषुसर्वेषुसुपुण्येषुप्रजायते। सकामानामियंव्युष्टिःकथितानृपसत्त
म। व्युष्टिःफलं॥ विष्णुलोकेनरायांतिनिष्कामाधेनुदानतइति। दक्षिणासुवर्णप्रभृतिशक्त्या
वामदग्न्यरत्ने। हिरण्यमितिहेमाद्रिः॥ इतिघृतधेनुदानं॥ अथजलधेनुदानं। जलधेनुंनरःप्राग्र कुंभं४
सुवर्णरजतान्वितां। सुवर्णरजतशृंगखुरान्वितामितिरत्नगर्भमहोत्सवेत्राश्वधात्र्यैःसमन्वितां। राम॰
सितवस्त्रयुगछन्नंदूर्वापल्लवशोभिते। कुंभमासीमुराशीरवालकामलकैर्वृते। प्रियंगुपत्रसंहि शूद्र४
तंसितवस्त्रोपवीतिनं। सछत्रंसउपानत्कंदर्भविष्टरसंस्थितं। चतुर्भिःसंभृतंभूपतिलपात्रैश्चतु
स्थि पु

[illegible]

दिशं। स्थापितंदधिपात्रेणघृतक्षौद्रवतामुखं। तिलपात्राणितान्यत्रमयानि। दधिपात्रकांस्यपात्रंउ
पोषितःवासुदेवंजलेशायमभ्यर्च्यसंकल्प्यजलधेनुंविप्रंचसंपूज्यसवत्सांधेनुंगुडधेनुवद्दद्यात्॥
इतिजलधेनुदानं॥ ॥अथक्षीरधेनुदानं॥ स्कांदे॥ क्षीरधेनुंप्रवक्ष्यामितान्निबोधनराधिप। अनु
लिप्तेमहीपृष्ठेगोमयेननराधिप। गोचर्ममात्रमानेनकुशानास्तीर्यसर्वतः। तस्योपरिमहाराजन्य
सेत्कृष्णाजिनंततः। तत्रगोमयेनकुंडलिकांकृत्वाक्षीरकुंभंतत्रस्थाप्यचतुर्थांशेनवत्सकं। शृंगाणि
चंदनागरुकाणि। प्रशस्तपत्रश्रवणांतिलपात्रोपरिन्यस्तां। मुखंगुडमयं। हेमंवा। जिह्वांशर्करया।
फलंदंताः। मुक्ताफलेक्षणा। इक्षुपादाः। दर्भरोमाः। सितकंबलकंबला। एतादृशींसवत्सांमभ्यर्च्य।
अद्येत्यादिअमुकगोत्रायामुकशर्मणेसालंकृतायइमांक्षीरधेनुंपूर्वोक्तसोपस्करयुतांसमस्तपा
पक्षयकामनुष्यमहंसंप्रददेनममेति। स्वस्तीत्युक्त्वाकामस्तुतिंपठेत्॥ ॥इतिक्षीरधेनुदानं॥
अथमधुदानं॥ ॥स्कांदे॥ मधुधेनुंप्रवक्ष्यामिसर्वपापप्रणाशिनीं। अनुलिप्तेमहीपृष्ठेकृष्णाजि
नकुशान्तरे। धेनुंमधुमयींकृत्वासंपूर्णघटपूरितां। तद्वच्चतुर्थभागेनवत्सांपरिकल्पयेत्॥ धेनुं
किनांक्षौमपुच्छांकांस्यतेहांस्वर्णशृंगाभरणोपेतांराजतखुरां। नानाफलजरूपदंतयुक्तांगोसवस्त्रांसंपाद्यएवंभूतांचसंचसी
पाद्य। अद्येत्यादितजन्ये। गोपुजनंब्राह्मणायरणपूजनंचकृत्वागोप्रार्थनंथालव्यांत्वादि। दक्षिणांतुरौप्यनिष्कशतंयाश्चेत्यादि

Indira Gandhi National
Centre for the Arts

दान० संपूज्य॥ अद्येत्यादिगोत्राय शर्मणेऽलंकृताय सौवर्णमुखीं अगरुचंदनशृंगीं ताम्रपृष्ठीं सत्रपुखुपादै
१५ रिक्षुमयां सितकंबलकंबलां गुडमुखीं शर्कराजिह्वां मौक्तिकनेत्रां फलदंतां धर्मरोमां रौप्यखु
रां प्रशस्तपत्रश्रवणां नवनीतस्तनीं सप्तधान्योपेतां॥ ततश्चत्वारि पात्राणि चतुर्दिक्षु निन्यसेत्॥
वस्त्रयुग्मेनाच्छाद्य भरणभूषितां कांस्यदोहनीं सुपूजितां पुच्छदेशोपविष्टाय मधुवाता इति मंत्रे
ण तुभ्यमहं संप्रददे न ममेति ततो दक्षिणां सुवर्णं दद्यात्॥ इति मधुधेनुदानं॥ ॥अथ शर्कराधेनु
दानं॥ स्कांदे॥ लब्ध्वा शर्कराधेनुं शृणु राजन्यथार्थतः॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे॥
धेनुभारचतुष्टयपरिमिता॥ तच्चतुर्थांशो वत्सः॥ भारद्वये अष्टमांश इति स्वशक्त्या वा कार्या॥ सर्व
धान्यानि चतुर्दिक्षु स्थाप्य॥ अद्येत्यादि शर्मणे गोत्राय सालंकृताय सुवर्णशृंगीं मौक्तिकनयनां गु
डमुखीं पिष्टमयजिह्वां कंबलपट्टसूत्रेण वेष्टितां कंठाभरणभूषितां पंचरत्नसमायुक्तां दर्भ दान० १५
रोमां कांस्योपदोहनीं गंधपुष्पैरर्चितां समस्तपापक्षयकाम इमां शर्कराधेनुं तुभ्यमहं संप्रददे न म
मेति सुवर्णदक्षिणां दत्वा विप्रस्वस्ति [illegible] कामस्तिं पठेत्॥ ततो धेनुं दत्वा विप्रस्य मुखं ने

क्षेतेति॥ ॥पंचरत्नानि तु अपरार्के॥ कनकं हीरकं नीलं पद्मरागं च मौक्तिकं॥ पंचरत्नमिदं प्रोक्तमृ
षिभिः पूर्वदर्शिभिरिति॥ ॥इति शर्कराधेनुदानं॥ ॥अथ दधिधेनुदानं॥ ॥तत्र गोलेपने कु
शकृष्णाजिने आस्तीर्य सप्तधान्यस्योपरि दधिकुंभं स्थाप्य चतुर्थांशेन वत्सं कृत्वा सौवर्णमुखीं
प्रशस्तपत्रश्रवणां मुक्ताफलेक्षणां चंदनागरुशृंगीं मुखे गंधद्रव्यविन्यासे गुडजिह्वां शर्करया
घ्राणं क्षीरखंडेन फलमयान्दंतान्॥ सितकंबलाच्छन्नां दर्भरोमां पुच्छं सूत्रमयं रूप्यखुरीं नवनीतस्त
नीं इक्षुपादां सर्वाभरणभूषितां वस्त्रयुग्मेनाच्छाद्य गंधपुष्पैरभ्यर्च्य गुडधेनूक्तमंत्रेण ब्राह्मणाय
दद्यात्॥ दधिक्राव्णो अकारिषमिति मंत्रेण दद्यात्॥ ॥इति दधिधेनुदानं॥ ॥अथ रसधेनु
दानं॥ ॥स्कांदे॥ रसधेनुं महाराज कथयामि समासतः॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशो
त्तरे॥ इक्षुरसस्य घटं पूरयित्वा तच्चतुर्थांशेन वत्सं॥ अद्येत्यादिगोत्रायामुकशर्मणेऽलंकृताय इमां
रसधेनुं सुवर्णशृंगां आभरणभूषितां वस्त्रपुच्छां पुष्पकंबलां ताम्रपृष्ठीं पुष्परोमां व्रीहिसमायुक्तां
चतुर्दिक्षु दीपसमायुक्तां वेगंधविभूषितां चत्वारि तिलपात्राणि चतुर्दिक्षु युक्तां सुपूजितां र
(सर्वगंधविभूषितां) सर्वं°

दान॰ सधेनुं तुभ्यमहं संप्रददे नममेति सुवर्णदक्षिणायुक्तां दद्यात्॥ मंत्रास्त्कगुडधेनुकोएव शेषोपस्का
१६ राश्च॥ एवमुच्चारयित्वा तु दीयते वै द्विजोत्तमे॥ दश पूर्वापरांश्चैव आत्मानं चैकविंशतिः॥ ॥
स्तारयेद्रसधेनुदानं॥ ॥अथ स्वरूपतो गोदानं॥ अंगिराः॥ गोरेकस्यैव दातव्या श्रोत्रियाय विशेष
तः॥ सा हि तारयते पूर्वाननूसप्तमं सप्त च॥ देवलः॥ सुशीलां लक्षणवतीं युवतीं वत्ससंयुतां।
बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्द्विचक्षणोति॥ तत्रादौ संकल्प्य विप्रं संपूज्य धेनुं सवत्सामपि शृंगमू
लादिस्तनांतान्विस्थानानि पूजयेत्॥ तद्यथा॥ शृंगमूले ब्रह्मविष्णुं पूजयामि॥ शृंगाग्रे सर्वतीर्थानि पूज
यामि॥ शिरोमध्ये शिवं पूजयामि। ललाटे देवीं पू॰ नासिकायां षण्मुखः पू॰ नासापुटे कंबलाश्वतरौ ना
गौ॰ कर्णयोरश्विनौ देवौ पू॰ चक्षुषि शशिभास्करौ पू॰॥ दंतेषु वायू वसून् पू॰ जिह्वायां वरुणं पू॰ हुंकारे सर
स्वतीं पू॰ ओष्ठाभ्यां संध्याद्वयं पू॰ ग्रीवायामिंद्रं पू॰ कक्षे देवीं रक्षांसि पू॰ उरसि साध्याः पू॰ जंघासु चतु
ष्पाद्धर्मः पू॰ खुरमध्ये सामं पू॰ पिंडे आदित्यरश्मयः गोमूत्रे गंगां पू॰ गोमये यमुनां पू॰ क्षीरे सरस्वतीं दान॰
पू॰ दधि सुनर्मदां पू॰ घृते ग्निं पू॰ रोमसु अष्टादशदेवतानां कोटयः पूजयामि॥ उदरे पृथिवीं पू॰ पयोधरे चत्वा १६
यो२

रः समुद्राः पू॰ ततो सर्वोपचारैः पूजयित्वा अद्येत्यादि गोत्रायामुकशर्मणे पृथ्वीदानफलकामः सर्वपापक्ष
यकाम इमां प्रत्यक्षधेनुं ताम्रपृष्ठीं रुक्मशृंगीं रूप्यखुरां कांस्यदोहनीं सवस्त्रां रुद्रदैवत्यां तुभ्यं संप्रद
दे विप्रहस्ते जलं दद्यात्॥ देवस्य त्वेति मंत्रं पठित्वा ततः पात्रपुच्छं घृत्वा कृ विप्रहस्ते तिलयवोदकं दत्वा
पठेत्॥ तत्र मंत्रः॥ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी॥ विश्वरूपधरो देवः प्रीयतामनया गवे
ति पठित्वा उत्सृजेत्॥ दानप्रतिष्ठार्थं सुवर्णदक्षिणां दत्वा प्रार्थयेत्। नमो गोभ्यः श्रीमतीभ्यः सौरभेयी
भ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः। गावो मे हृद
ये संतु गवां मध्ये वसाम्यहं। मिति पठित्वा धेनुं द्विजं च प्रदक्षिणीकृत्य किंचिदनुव्रजेत्॥ ॥इति स्वरूपतो
गोदानं॥ ॥अथ मात्स्ये॥ हेमशृंगीदानं॥ दशसौवर्णिके शृंगे खुराः पंचपलान्विताः। पंचाशत्यधिकं कांस्यं ताम्र
वापि तथैव च॥ अन्यत्रापि सुवर्णमेव दक्षिणेति॥ हेमशृंगीदानं॥ अथ कार्पासधेनुदानं॥ वाराहे॥ अथ धेनुं प्र
वक्ष्यामि धेनुं कार्पासिकीं भुवि। सर्वविघ्नस्य गुह्यं च ब्रह्मणा स्वां भुवं कृतं। सा च कार्पासधारेण धेनुः श्रेष्ठा प्रकी
र्तितेति मध्यमा च तदर्धेन तदर्धेन कनीयसी॥ पूर्ववद्रत्नधान्यं च सहिरण्यं तथैव च॥ वत्सकं तु चतुर्थांशात् दा
नमंत्रो ऽभिधीयते॥ कुर्वीत पूर्ववद्रत्नैर्वस्त्रैर्धान्याद्युपेस्कृतौ॥ वाराहोक्तं तिलधेनुदानवत्प्रार्थना॥ हेमकुंदेऽ

Indira Gandhi National
Centre for the Arts

दान॰ १७ सदृशोक्षीरार्णवसमुद्भवे। सोमप्रियेसुधन्वाख्येसोरभेयेनमोस्तुते॥ दत्तेयमिंदुनाथायशशांकायामृता
यच॥ अत्रिनेत्रप्रजातायसोमराजायवेनमः॥ यस्त्वेवंवरदाभक्त्या ब्राह्मणायप्रयच्छति। सयातिचंद्रलोकं
तुसोमेनसहमोदते॥ ॥इतिकार्पासधेनुदानं॥ ॥अथलवणधेनुदानं॥ ॥भविष्ये॥ नत्रयुधिष्ठिरंप्रति
कृष्णः॥ शृणुराजन्प्रवक्ष्यामिलवणस्यैककल्पितां॥ गोमयेनानुलिप्तेतुदर्भसंस्तरसंस्थितां॥ आविकंच
र्मविन्यस्यपूर्वाग्रांभिमुखस्थितां। वस्त्रेणाच्छादितंकृत्वाधेनुंकुर्वीतबुद्धिमान्॥ आढकेनैवकुर्वीतबद्धावि
तोपकल्पितां॥ गांविप्रवत्सं[illegible] अद्येत्यादिगोत्रायामुकेशर्मणेइमंलवणनिर्मितां... सैंधवस्तुक्रैवर्णांस्तक्रापिंड
कल्पोपोयवास्यांकेवलपट्टसूत्रगैवेयकांभाम्रपृष्ठींगुडापानां... बलंलांगूलांमधुयोनिंदुग्धभार्यां... प्र
क्षिणीकृत्यसदद्यात्॥ शेषंमधुधेनुवत्॥ प्रार्थना॥ लवणेवैरसाःसर्वेलवणेसर्वदेवताः॥ सर्वदेवमयीदेवीलव
णाख्येनमोस्तुते॥ पुराणांतरे॥ षोडशाप्रस्थमितांधेनुंचतुर्थांशेनवत्सामिति॥ इतिलवणधेनुदानं॥ ॥
अथसुवर्णधेनुदानं॥ वह्निपुराणे॥ सुवर्णधेनुंवाप्यत्रसुवर्णाच्चचतुर्दश॥ सुनिर्मितांसुवर्णेभ्यसप्तभि राम॰
र्मध्यमामता॥ चतुर्भिश्चकनीयाचचतुर्थांशेनवत्सकः॥ गुडधेनुविधानेनदत्तासर्वफलप्रदा॥ अत्रवि १७
शेषः॥ रौप्यवत्सकइतिकेचित्॥ प्रवालकेशींघृतपात्रस्तनवतींकांस्यपृष्ठींपट्टसूत्रलांगूलांसप्तधान्य

स

प्राह्लादद्वारा समायुक्तांफलपुष्पयुतांछत्रोपानत्समन्वितामिति॥ सुवर्णधेनुंविप्रायप्रतिपाद्येदशीनरः॥ हिरण्यरेतापु
रुषःपुराणःकृष्णपिंगलः॥ तत्सहेमच्छविस्त्वष्टाविश्वात्माप्रीयतामिति॥ अनेनैवतुमंत्रेणधेनुदानंप्रकी
र्तितं॥ अश्वमेधसहस्रस्यफलमाप्नोत्यसंशयं॥ कुलानांचसहस्रस्यस्वर्गंनयतितद्ध्रुवं इति॥ ॥इतिसु
वर्णधेनुदानं॥ ॥अथवंध्यात्वहरणं॥ सुवर्णधेनुदानं॥ वायुपुराणे॥ वंध्याचतुर्विधोक्ता॥ वंध्याकाक
वंध्या। स्त्रीप्रसूता। मृतप्रजाइति॥ काकवंध्याकाकवदेकापत्या॥ शेषास्पष्टाएव॥ स्वरूपमाह॥ हिरण्य
नयथाशक्त्यासवत्सांकारयेत्दृढां॥ धेनुं...लेनवत्संचपादेनगुरुरब्रवीत्॥ रौप्यखुरांरत्नपुच्छांनियो
ज्य। घंटांगले। उभयोरपिबध्नीयात्॥ तिलकंललाटेकृत्वाएतादृशीं॥ समर्च्यपायसनैवेद्यंमोदकान्
अपूपान्गुडलवणजीरकंचपूर्वंनिधायएकैवायत्नीधनंचब्राह्मणस्त्रीषुषट्अष्टौवाददान्ततोब्राह्मण
मलोलुपमाहूयवस्त्राद्यैःसंपूज्यततोधेनुंसवत्सांसंपूज्यसमिदाज्यचरुद्रव्यैःसोमोधेनुमितिमंत्रेणहो
मंअष्टोत्तरशतसंख्याकंकृत्वास्वयंउदङ्मुखःप्राङ्मुखायोपविष्टायपुच्छंहस्तेनिधाय। दद्यात्मंत्र
स्तु। धेनुर्यानिरसांसत्वेवसिष्ठसुरभीतथा। दुहिताचतथाभानोरग्नेश्चवरुणस्यच। याश्चैवगावःप्रवर्त
तेवनेषूपवनेषुच। प्रीणंतुताममसदापुत्रपौत्रप्रवर्द्धना। पयच्छंतुदिवारात्रंअविच्छेदंवसंततःइति
प्रतिष्ठासुरभेर्ध्यामा२ दाःसुखं१

Indira Gandhi National Centre for the Arts

प्रतिपत्तीपाठ

दान० पठित्वा देवस्य त्वेति मंत्रेण दद्यात्। प्रार्थना। वंध्या त्वं काकवंध्या त्वं कन्याप्रसव एव च। तथैव मृतव
१८ त्सा ते दोषं मम चतुर्विधं। दाने नानेन हरतु या सा कामदुघानघा। ततो सुवर्णदक्षिणां दद्यात्॥ ॥
इति वंध्यात्वहरणं सुवर्णधेनुदानं॥ ॥अथोभयतोमुखीदानं॥ मात्स्ये॥ रुक्मशृंगी रौप्यखुरां मुक्ता
लंकारभूषितां। कांस्योपदोहनां राजन् सवत्सां द्विजपुंगवे। प्रसूयमानां यो दद्यात् धेनुं द्रविणसंयुतां।
।यावद्वत्सो योनिगतो यावद्गर्भं न मुंचति॥ तावद्गौः पृथिवी ज्ञेया सशैलवनकानना। देवलः॥ अलं
कृत्वा क्रमविधिना सुवर्णत्रिपलान्विता॥ देया च द्विपलामध्या पलैकादक्षिणाधमा॥ वाराहे तु सुव
र्णसहस्र तदर्द्धं तदर्द्धशक्त्या वा जद्येत्यादि ग्रहसमुद्रसशैलवनोपेतपृथिवीदानसमफले तद्धेनु
सवत्सरोमसंख्यायुग देवलोकमहितत्पितृपितामहप्रपितामहनरकोद्धारणघृतक्षीरवहबहु
कुल्याकरदधिपायसकर्दमदेशाधिकरणकेप्सितकामब्रह्मलोकावाप्तकाम उभयतोमुखीदास्ये इति
संकल्प्य ॐ हंमहीमवनिं विश्वधेनां तुवीरतये वैश्याय क्षरंती। अरमयानमसे जरदनः सुतरणां अह
गारिंदुसिंधूनां। इति गामनुमंत्र्य विप्रं वस्त्रादिभिः संपूज्य गां वस्त्रैरभ्यर्च्यालंकृत्य अद्येत्यादि गोत्राया दान०
मुकशर्मणे इमां सोपस्करां उभयतोमुखीं रुद्रदैवतां तुभ्यमहं संप्रददे न ममेति दद्यात्॥ विप्रेण विधि १८

वत्सां प्रतिगृह्य ॐ स्वस्तिरस्त्विति गोपुच्छं स्पृष्ट्वा सुवर्णदक्षिणां प्रतिगृह्य स्पृष्ट्वा इरावती धेनुमती स्यो
ना पृथिवीति मंत्रद्वयं जप्त्वा प्रतिगृह्णामि मां धेनुं कुटुंबार्थे विशेषतः। स्वस्तिर्भवतु मे नित्यं रुद्रमा
तर्नमो नम इति। गृहीतायां दक्षिणेन पाणिना। ॐ गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा। शतं
मा पुर आयसीररक्षन्नध श्येनो जवसा निरदीयं॥ इति गर्भमाकृष्येत्। अनंतरं कृत्यमाहनि क्रांते स
ति। अग्निमुपसमाधाय देवान् पितॄन् नदीन् पर्वतान् वनस्पतीनुदधीन्नागानोषधीस्तर्पयेत्॥ तत्र मंत्राः।
यदेवास इति देवान्। उशंतस्त्वा० इमं मे गंगे। अद्भिः सुनामाद्भिश्च० वनस्पते। समुद्रज्येष्ठाः। अदिति रि
वभोगेः० मधुवाता० पृथिवी तर्पयेत्० ततो होमः। ईशंममंमे लेद्यावापृथिवी० मही द्यौः० उर्वी पृथ्वी० गो
रीर्मिमाय। ततः समस्तव्याहृतिभिः चतुरशीत्याहुतीर्हुत्वा स्वस्त्ययनं वाचयित्वा। गामनुव्रज्य प्रमुक्तो
गेमंत्री विद्यां जप्त्वा पायसादिना ब्राह्मणान् भोजयित्वा स्वयं भुंजीत॥ ॥७॥ इत्युभयतोमुखीदानं॥
इति कंठमनडुहं सर्वरत्नैरलंकृतं। दत्त्वा प्रजायते लोकान्विशोकः प्रपद्यते। सुवर्णशृंगरौप्यलांगूला
हिकमपि महाभारतोक्तं बोध्यं॥ इति कंठप्रबलगलकंबलमिति॥ ॥अथ वैतरणीदानं॥ ब्रह्मवैवर्त्ते।
यासौ वैतरणी नाम यमद्वारि महानदी। शतयोजनविस्तीर्णा पृथुला सा महासरित्॥ अगाधानंतरूपा

Indira Gandhi National
Centre for the Arts

श्वेतसहस्रमपदानः

तास्रभाते

दान० चदृष्टमात्रात् भयप्रदा॥ पतंति तत्र वै मर्त्याः क्रंदमानाः सुदारुणे॥ अयने विषुवे चैव व्यतीपाते दिनक्षये॥
१८ पाटला मथवा कृष्णां कुर्याद्वैतरणीं शुभां॥ स्वर्णशृंगीं रौप्यखुरां कांस्यपात्रोपदोहनां॥ कृष्णवस्त्रयु
गच्छन्नां सप्तधान्यसमायुतां॥ कार्पासद्रोणशिखरे ताम्रपात्रे आसीनं हैमं यमं लोहदंडयुक्तं महिष
मारूढं पाशहस्तं इक्षुदंडमयं उडुपं पट्टसूत्रेण बध्वा उडुपोपरि तां धेनुं कृत्वा छत्रोपानत्समायुक्तां
जलं गृही त्वा दद्यात्॥ यमद्वारि महाघोरा या सा वैतरणी नदी॥ तर्तुकामो ददाम्येनां तुभ्यं वैतरणी च
गामिति मंत्रेण गामधिवासयेत्॥ ततो गां विप्रप्रतिमां च संपूज्य मत्स्यकाले वा अर्घ्यादि अमुकगो
त्राया मुकशर्मणे यमद्वारस्थिता यानि घासुखेनोत्तरणार्थं इमां वैतरणीं गां सवत्सां सोपस्करां प्रतिमास
हितां विष्णुदेवतां संप्रददे॥ दानमंत्रः॥ विष्णुरूप द्विजश्रेष्ठ भूदेवः पंक्तिपावन॥ सदक्षिणा मया तुभ्यं
दत्ता वैतरणी च गौरिति। ततः सुवर्णदक्षिणां दत्वा तत्पुच्छं प्रगृह्यानुव्रजेत्॥ तत्र मंत्रः॥ धेनुके त्वं प्र
तीक्षस्व यमद्वारे महाभये। उत्तितीर्षुरहं देवि वैतरण्येन मोऽस्तु ते॥ ॥इति वैतरणी दानं॥ ॥अथ महि दान०
षी दानं॥ भविष्ये० महिषी दानमाहात्म्यं कथयामि युधिष्ठिर। पुण्यं पवित्रमायुष्यं सर्वकामप्रदं त १८
था। चंद्रसूर्यग्रहे कार्त्तिक्यां अयने सितवतुर्दश्यां संक्रांतौ संपत्तौ वित्तशाठ्यस्य देया॥ प्रमेयैर्युता

प

४ रुद्रकृवद्यावती वीरशपात्रैरवली ४

दोषवर्जिता। ततो महिषीं विप्रं चाभ्यर्च्य प्रदक्षिणी कृत्य० अर्घ्यादि० इंद्रादिलोकपालानां या रा
जमहिषी शुभा। महिषी दानमाहात्म्यात्सा स्कमे कामदा सदा० धर्मराजस्य महात्म्ये यस्याः पुत्रः प्रति
ष्ठितः। महिषासुरस्य जननी या सा स्कवरदा मम्मेति। अमुकगोत्राया मुकशर्मणे इमां महिषीं सुवर्णशृं
गतिलकाभरणां घंटायुतां ताम्रदोहनीं पिण्याकपिटकसप्तधान्यपादुकोपेतां आयुष्यसुखमहारा
ज्यकामस्तुभ्यमहं संप्रददे इति। अनेन विधिना दत्वा महिषीं द्विजपुंगवे। सर्वान्कामानवाप्नोति इह लो
केपरत्र च। स्त्रीराजस्त्रीकामेति सत्त्रियो जयकामेति वैश्यो धनकामेति शूद्रो भिलषितमिति॥ ॥इति
महिषीदानं॥ ॥अथ मेषी दानं॥ भविष्ये॥ शृणु मेषी परं दानं सर्वकिल्बिषनाशनं॥ यद्दत्वा विविधं पापं
सद्यो विलयमृच्छति॥ तत्र अयने विषुवे ग्रहणद्वये दुःस्वप्नदर्शने वित्तवित्तानुसारे काले कार्यं तीर्थे वित्ते
श्राद्धलं वा घृतं करं विष्णुं गौरीं गायत्रीं श्रीसहितां यथाशक्ति सुवर्णप्रतिमां कृत्वा रत्नसहानं गलोकपालानुष्ट्वा
४ तास्त्वा अभ्यर्च्य तदग्रे तन्मंत्रे स्तिलाज्ये रष्टाविंशतिसंख्याके हुत्वा ततो मेषीं विप्रं च संपूज्य० अर्घ्यादि
सर्वकौ पापक्षयकामः पुत्रधनकीर्त्तिकाम दुःस्वप्नतत्त्वचितनिवृत्तकाम इमां सुवर्णतिलकाघंकितां को
शेयपरिधानां पुष्पोपहारां सप्तधान्ययुक्तां संमुखस्थापितलवणप्रतिमायुक्तां गोत्राय शर्मणे तुभ्य

Indira Gandhi National Centre for the Arts

दान० मंहसंप्रददे॥ दक्षिणां शक्त्या दत्वा प्रार्थयेत्॥ वाङ्मनःकायजनितं यत्किंचिन्मम दुष्कृतं। तत्सर्वं विलयं या
२० तिलदानानुपसेवितमिति॰ प्रतिमास्थापनं तिलपूर्णकुंभे॰ मेषी प्रत्यक्षा सुवर्णभारशतेन कारयेत्।
तां तु सुवर्णस्य प्रथलतः। यथाशक्त्या ववा कुर्याद्वित्तशाठ्यं न कारयेत् इति भविष्योक्तेः॥ अत्र प्रतिग्रही
न विप्रसंभाषणं मुखावलोकनं च वर्जयेत्॥ ॥इति मेषीदानं॥ अथाजादानं॥ ॥सुमंतुः॥ अजा याश्च
महीपालो ह्यजादाने दिवं गतः। अयने विषुवे चैव युगादौ ग्रहणेषु च। अमावास्यामजादानं पौर्णमास्यां
वशस्यते। विधिं तस्य प्रवक्ष्यामि विश्वामित्रेण निर्मितं॥ ततो जां विप्रं च संपूज्य॰ अद्येत्यादि अमुकगो
त्रायामुकशर्मणे इमां अजां सप्तधान्योपरिस्थितां वस्त्रमाल्योपशोभितां वज्रनेत्रां हेमशृंगीं ताम्रपृ
ष्ठीं कांस्यदोहनां रौप्यपादां ससुतां कुक्षौ तिलोदकं दत्वा दद्यात्। मंत्रः॥ मंत्रवासो अजा श्लक्ष्णेणैवाग्नि
संपकरे स्थिते॥ स्पष्टा त्वं दह मे पापं जन्मांतरशतैः कृतं। प्रार्थना॥ त्वं पूर्वं ब्रह्मणा सृष्टा पवित्रं भवती परं॥
त्वत्स्संतौ स्थिता यज्ञास्तस्मात्शांतिं प्रयच्छ मे॥ ॥इत्यजादानं॥ महिषदानं महिषीवज्ज्ञेयं॥ अथ मेष
दानं॥ बौधायनः॥ अग्नेर्मांद्यं भवेद्यस्य मस्ते तानि विनाशकः। वक्ष्यामि तत्प्रतीकारं यथोक्तं ब्रह्मणा राम०
पुरा॥ पलो र्द्धेन तदर्धेन तदर्द्धेनाथवा पुनः। राजतं कारयेत्सौम्यं अग्नेर्वाहनमुत्तमं। सौवर्णश्चैरखुराः २०

कार्याः श्वेतवस्त्रेण वेष्टयेत्॥ तत्र श्वेतगंधं श्वेतपुष्पं मधूकं धूपं दद्यात्॥ द्रोणद्वयतंडुलोपरिस्थं पूज
येत्॥ आग्नेय्यां दिशि होमः॥ समिदाज्यतिलैः कार्यः। अग्निर्मूर्द्धा॰ समित्॰ अग्नये स्वाज्यं। अग्निना
ग्नि तिलाक्षतैः कार्यः। अग्नेः प्रायुनरिष्टो कुंभस्थाप्य प्रणीतामोक्षपर्यंतं कृते स्नाने विधाय आपो हि
ष्ठेति तृचेन॥ हिरण्यवर्णेति चतुरृचा पवमानानुवाकेन रोगिणं मार्जयेत्। शन्नो वातानुवाकेन शांतिं पठे
त्॥ तस्मै हुतवते रोगी प्राङ्मुखाय उदङ्मुखः पूजिताय विधायस दक्षिणां सोपस्करं मेषं प्रत्यक्षं रजतं वा
दत्वा प्रार्थयेत्। देवानां यो मुखं हव्यवाहनः सर्वपूजितः। तस्य त्वं वाहनः पूज्यो देवैः सेंद्रैर्महर्षिभिः।
अग्निमांद्यं पूर्वकर्म [illegible] विपाकोत्थं तु यन्मम। तत्सर्वं नाशय क्षिप्रं जठराग्निं प्रवर्धयेति दानमं
त्रः॥ ततो भूरि दत्वा स्नात्वा बंधुभिर्विप्रैः सह भुंजीतेति॥ इति मेषदानं॥ ॥अथाचलदानं॥ मात्स्ये॥
प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः। गुडाचलस्तृतीयः स्याच्चतुर्थो हेमपर्वतः। तिलशैलः पं
चमः स्यात्षष्ठः कार्पासपर्वतः। सप्तमो घृतशैलः स्यादष्टमो रत्नशैलकः। नवमो रौप्यशैलः स्याद्दश
मः शर्कराचलः इति॥ कालो हेमाद्रौ मात्स्ये॥ अयने विषुवे चैव व्यतीपाते दिनक्षये। शुक्लपक्षे तृतीयायां
उपरागे शशिक्षये। विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः। शुक्लायां पंचदश्यां वा पुण्यर्क्षे वा विधा

दान॰ नतः॥ धान्यशैलादयो देया यथाशास्त्रं विधानतः॥ तीर्थे वायतने वापि गोष्ठे वा पथ वांगणे॥ तत्र चतुरस्रं
२१ मंडपं चतुर्मुखं वा प्राच्यामुदीच्यां वा एकमेव द्वारं न चत्वारि॥ तोरणमप्येकमेव॥ मंडपो द्वादशहस्तो
गोमयेनोपलिप्य कुशानास्तीर्य तन्मध्ये पर्वतं कुर्यात्। पर्वतैर्निष्कंभैर्युतं॥ धान्यद्रोणसहस्रेण गि
रिरुत्तमः। पंचशतिको मध्यमः। त्रिभिः शतैः कनिष्ठः। मेरुर्महाव्रीहिमयो मध्ये तदुपरि मंदारपारि
जातककल्पवृक्षादयो हेममयास्त्रयः। मध्ये कल्पतरुर्मंदारपारिजातौ दक्षिणोत्तरयोः। पूर्वपश्चिमयोर्ह
रिचंदनसंतानौ। मुक्ताफलवज्रगोमेदगारुत्मतनीलरत्नवैडूर्य- एतानि मुक्ताफलादीनि पूर्वादिदि
गवस्थितराजतभंगेषु निवेशयेत्। मंदारः श्रीखंडखंडैरन्वितः प्रवालवान्वितः शुक्तिशिलातलस्थो
तु॥ शार्करत्वलेतुहरिचंदनसंतानानावश्यकौ। तत्र पूर्वादिदिक्षु ब्रह्मविष्णुरुद्रसूर्यप्रतिमाः पक्षिसंघाः
मुनिसंघाश्च हेमाः प्रागादिदिक्चतुष्टये क्रमेण पूर्वोक्तमुक्ताफलादिभिर्भूषितं रौप्यभंगचतुष्कं त
द्विर्दिगष्टके रौप्यं इंद्रादिलोकपालानां प्रतिमाष्टकं समं नातः श्रीखंडैर्लतानां स्थाने प्रवालतिशि
लानां शुक्तिः। प्रागादिषु मेघानां श्वेतपीतकर्बुररक्तवस्त्राणि। वेशानामिक्षुर्नुजलस्य। तत्र गंधपुष्प राम॰
नानाफलानि च परितः संस्थाप्य पंचवर्णवितानकं चोपरि बध्नीयात्। ततोयं वै मेरोः षोडशांशेन २१

प्राच्यां मंदारं तदुपरि नररूपं गणत्रयं कदंबे च सौवर्णकदंबमूले हेमः कामदेवः अरुणोदसरस्थाने
दुग्धपूर्णरौप्यपात्रे रौप्यं चैत्ररथाख्यं वनं गंधपुष्पफलवस्त्राणि च स्थापयेत्। याम्ये मेरुषोडशांशगो
धूममयं गंधमादनं। तदुपरि सौवर्णजंबूवृक्षं तन्मूले सौवर्णमुदङ्मुखं धनदं मानससरस्थाने सघृतं
रौप्यगंधर्वाख्यवनं नानाफलवस्त्रमाल्यानि च स्थापयेत्। पश्चिमे मेरुषोडशांशतिलमयं विपुलं पर्व
तं तदुपरि सौवर्णपिप्पलं तन्मूले प्राङ्मुखं सौवर्णहंसप्रतिमां सितोदसरस्थाने दधिपूर्णरौप्यपात्रे रौप्यं
वैभ्राजवनं वस्त्रफलमाल्यानि च स्थापयेत्। उत्तरे मेरुषोडशांशमितमाषैः सुपार्श्वपर्वतं तदुपरि सौ
वर्णवटं तन्मूले दक्षिणामुखीं सवत्सां सुवर्णधेनुं भद्रसरस्थाने मधुपूर्णरूप्यपात्रे रौप्यं सावित्रं वनं॰
वस्त्रफलानि च स्थापयेत्। एवं वक्ष्यमाणपर्वतेष्वपि मेरुद्रव्यचतुर्थांशेन लवणादिद्रव्येण प्रागादिषु
विष्कंभपर्वता ज्ञेयाः॥ ॥अथ यजमानोऽद्येत्यादि अमुकरोगनिवृत्तिपुत्रविभूतिकरणक स्वर्लोकगमन
सायमन्वंतरकालदेवलोकवासोत्तरभूलोकराजराजत्वकाम ईश्वरप्रीतिकामो वा श्रीधान्यपर्वतदानम
महं करिष्य इति संकल्प्य गणेशपू॰ स्वस्तिवाचनमातृकापू॰ नांदीश्राद्धं कृ॰ आचार्यसहितवरणं म
धुपर्कपूजनं। पूजाचार्यनियोगात् तं कुर्यात्। अथाचार्यो द्विजः ग्रहादिस्थापनादि प्राक्कुंडसमीप

Indira Gandhi National Centre for the Arts

दान• स्थितकलशस्थापनांतंकुर्यात्॥ ॥अथयजमानःप्राक्कुंडेग्रहादिद्वात्रिंशद्देवताभ्यःस्वस्वमंत्रैस्तिलैःपृ
२२ थक्पृथक्घृताभ्यांमिलिताभ्यांकुशैश्चेतित्रिभिःसाधनैःप्रत्येकमष्टवारंहुत्वादशलोकपालेभ्यो
ष्टवसुभ्यएकादशरुद्रेभ्योद्वादशादित्येभ्यश्चप्रत्येकमष्टसंख्ययासमिद्भिस्तिलैर्वाजुहुयुः॥ततःपु
रुषसूक्तेनब्रह्मविष्णुरुद्रेभ्यःसमिद्भिःस्तिलैर्वासर्वकामदेवधनदंहंसकामधेनुभ्यस्तिलैर्घृतेनवा
ष्टोत्तरशतंजुहुयुः॥ततःचतुःपंचाशत्तिलैर्घृतेनवेति॰ततोयजमानोमेरुमावाह्यपूजयेन्मंत्रः॥त्वं
सर्वदेवगणधामनिधिर्विरुद्धमस्मद्गृहेघमरपर्वतनाशयाशु।क्षेमंविधस्वकुरुशांतिमनुत्तमानःसं
पूजितःपरमभक्तियुतोमयाद्य॥त्वमेवभगवानीशोब्रह्माविष्णुर्दिवाकरः।मूर्त्तामूर्त्तपरंबीजमतःपा
हिसनातन।यस्मात्वंलोकपालानांविश्वमूर्त्तेश्चमंदिर।रुद्रादित्यवसूनांचततःशांतिंप्रयच्छमे।यस्मा
दशून्यममरैःनारीभिश्चशिरस्तव।तस्मान्मामुद्धराशेषदुःखसंसारसागरात्।मंदरस्य॥यस्माच्चै
त्ररथेनत्वंभद्राश्वप्रमुखेनच।शोभसेमंदरक्षिप्रमतस्तुष्टिकरोभव॥ ॥गं[illegible]मादनस्य।यस्माच्चूड़ा दान•
मणिर्जंबूद्वीपेत्वंगंधमादन।गंधर्ववनभोशोभावानतःकीर्त्तिर्दृढास्तुमे॥विपुलस्य॥यस्मात्वंकेतुमा
लेनवैभ्राजेनवनेनच।हिरण्मयाश्वत्थशिरास्तस्मात्पुष्टिर्दृढास्तुमे।सुपार्श्वस्य।उत्तरैःकुरुभि २२

यस्मात्सावित्रेणवनेनच।सुपार्श्वशोभसेनित्यमतःश्रीरक्षय्यास्तुमे॥ततःसर्वेजागरणेकृतेप्रातः
स्नात्वाकुंडसमीपस्थकलशजलेनयजमानमभिषिंचेयुः।यजमानोगृहीतकुसुमोमेरुंप्रदक्षि जग ३
णीकृत्योपतिष्ठेत्॥अन्नंब्रह्मरसःप्रोक्तंअन्नेप्राणाःप्रतिष्ठिताः।अन्नाद्भवंतिभूतानिजगदन्नेनवर्त्त
ते।अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः।धान्यपर्वतरूपेणपाहितस्मान्नमोनमः॥इत्युपस्थाय
पुष्पांजलिंप्रक्षिप्यनमस्कृत्यप्राङ्मुखोपविश्योदङ्मुखाय्योगुर्वादिभ्यःक्रमेणगिरीन्दद्यात्प्रयो
गः॥अद्येत्यादिगोत्रामुकशर्मणेसालंकृतायगुरवेअप्सरोगंधर्वयुतविमानकरणस्वर्गलोकग
मनानंतरसामन्वंतरशतावधिसमयदेवलोकेनिवासोत्तरभूलोकराजत्वप्राप्तिकामइमंधान्य
मेरुंसौवर्णमंदारादिवृक्षपंचकसौवर्णब्रह्मविष्णुरुद्रार्कप्रतिमायुक्तंमुक्ताहीरकादिभूषितरौप्य
मयश्रृंगचतुष्कशोभितंरूप्यमयेंद्रादिलोकपालप्रतिमैरौप्यमयनियतंवान्वितमक्षिवेशमितकं
दरादिचतुष्टयस्थापितरौप्यपात्रस्थितक्षुद्रोदकप्रस्रवणादिचतुष्टयस्थापितकर्पूरखंडवस्त्रांबु
घटनानाफलमाल्यवितानाद्युपकरणसहितंतुभ्यंसंप्रददेनममेतितद्धस्तेदद्यात्।सर्वंस्वस्ती
तिप्रतिगृह्यकामस्तुतिंपठेत्॥ततःकृतेतद्दानप्रतिष्ठार्थंइमांगांदक्षिणात्वेनसंप्रददेनममेतिदद्या

Indira Gandhi National
Centre for the Arts

दान० चतुर्विंशतिपक्षेअष्टौगांगुरवेचतस्रश्चतस्रऋत्विग्भ्यः दशपक्षेगुरवेषट्ऋत्विग्भ्यएकैकाएक
२२ पक्षेगुरवेएवतांकपिलांऋत्विग्भ्यः सुवर्णइतिमदनादयः॥ एवंपूर्वास्थितमंदराख्यविष्कंभंसप्र
तिमंऋत्विजेसंप्रददेनममेतिदद्यात्॥ एवमेवदक्षिणस्थंगोधूममयंगंधमादनं० पश्चिमस्थंति
लमयंविपुलाख्यं० उत्तरस्थंमाषमयंसुपार्श्वाख्यंऋत्विग्भ्योदद्यात्॥ लवणाचलादिदानप्रक्षेप
योगधान्यप्रदस्थानेलवणादिपदंप्रक्षेप्यं तत्तत्फलानितत्रतत्रवक्ष्यामः॥ ततोग्रहवेद्यांयजमा
नोदेवतासंपूज्यनमस्कुर्यात्। गुरुस्ताश्चविसर्जयेत्॥ ततोमंडपादिग्रहप्रतिमादिगुरवेप्रतिमादा श्री:
नृयसारत्वायस्यस्मृत्येतिविष्णुंस्मृत्वाकर्मईश्वरेसमर्प्यआशिषोगृह्णीयात्। ब्राह्मणांश्चभोजय
स्वयंसुहृद्भिःसहभुंजीतेति॥ ॥इतिधान्यादिमेरुसाधारणप्रयोगः। अथलवणाचलः॥ ॥पद्मे॥
उत्तमःषोडशद्रोणैःकर्तव्योलवणाचलः। मध्यमःस्यात्तदर्धेनचतुर्भिरधमःस्मृतः॥ वित्तहीनोयथा
शक्त्याद्रोणादूर्ध्वंतुकारयेत्। चतुर्थांशेनविष्कंभपर्वतान्कारयेत्पृथक्॥ अयंन्यायःसर्वविष्कंभप राम०
र्वतेषुज्ञेयः इतिमदनः। विधानंपूर्ववत्हेमतरून्लोकपालान्कामदेवादीनपिपूर्ववत्॥ तथैवसंकल्प्य
प्रार्थयेत्। सौभाग्यरससंभूतोयतोयंलवणोरसः॥ तदात्मकत्वेनचमांपाहिपापान्नमोनमः। यस्मा २२

दन्नरसाःसर्वेनोत्कृष्टालवणंविना॥ प्रियंचशिवयोर्नित्यंतस्माच्छांतिंप्रयच्छमे। विष्णुदेहसमुद्भूते
यस्मादारोग्यवर्द्धने। तस्मात्पर्वतरूपेणपाहिसंसारसागरात्॥ कल्पपर्यंतमुमालोकप्राप्तिसम
नंतरपरमगतिप्राप्तिकामईश्वरप्रीतिकामोवालवणाचलदानंकरिष्येइतिसंकल्पः। जयमेववि
शेषोन्यत्सर्वंपूर्ववत्॥ ॥इतिलवणाचलदानं॥ अथगुडपर्वतदानं॥ ॥पाद्मे॥ अथातःसंप्रवक्ष्या
मिगुडपर्वतमुत्तमं॥ यत्प्रदानान्नरःस्वर्ग्यंप्राप्नोतिसुरपूजितं॥ उत्तमोदशभिर्भारैःपंचभिर्मध्यमः
स्मृतः। त्रिभिर्भारैःकनिष्ठःस्यात्तदर्धेनाल्पवित्तवान्। तुलास्त्रियांपलशतंभारःस्याद्विंशतिस्तुलास्य
मरः॥ विधिस्तुपूर्ववत्संपूज्यप्रार्थयेत्। यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः। सामवेदस्तुवे
दानांमहादेवस्तुयोगिनां। प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा। तथारसानांप्रवरःसदैवेक्षु
रसोमतः। ममतस्मात्परांलक्ष्मींददस्वगुडपर्वत। यस्मात्सौभाग्यदायिन्याभ्राताऽसिगुडपर्वत।
निवासश्चापिपार्वत्यास्तस्मान्मांपाहिसर्वदा॥ इति॥ दानवाक्यं॥ सकलपापक्षयोत्तरंगंधर्वपूज्य
मानत्वपूर्वककल्पशतावधिगौरीलोकप्राप्त्यनंतरंसंपन्नोपराजितायुरारोग्यपूर्वकसप्तद्वीपावधि
पतित्वकामईश्वरप्रीतिकामोवेतिसंकल्प्यविशेषोन्यत्सर्वंपूर्ववत्॥ ॥इतिगुडपर्वतदानं॥ ॥

Indira Gandhi National
Centre for the Arts

दान० २८

अथसुवर्णाचलः॥ ॥पाद्मे॥उत्तमः पलसाहस्रोमध्यमः पंचभिः शतैः॥तदर्द्धेनाधमस्तद्वदल्पवि
त्तोपिशक्तितः॥दद्यादेकपलादूर्ध्वमिति।पलसहस्रोउत्तमः।पंचशतकोमध्यमः।तदर्धोधमः।अ ब्रह्म ३
ल्पवित्तोपलादूर्ध्वंकुर्यात्।धान्यपर्वतवद्विधानं।ततोसंपूज्यप्रार्थयेत।नमस्तेगर्भायब्रह्मबीजाय
वेनमः।यस्मादनंतफलदस्तस्मात्पाहिशिलोच्चय।यस्मादग्नेरपत्यंवैयस्मात्तेजोजगत्पतेः।हेम
पर्वतरूपेणतस्मात्पाहिनगोत्तमेति।दानवाक्यंअत्रसकलपापक्षयपूर्वकशतकल्पावधिआनं
दकारकब्रह्मलोकभोगानंतरपरमगतिकामइति।गुर्वादिभ्यएवसर्वंदानं।तदल्पद्रव्यविषयं।
अत्रबहुद्रव्येषुतुलापुरुषतदर्धंचतुर्थांशेनान्येभ्योपिशिष्टंभ्यादेयमितिहेमाद्रिः।इतिसुवर्णा
चलदानं॥ ॥अथतिलाचलः॥पाद्मे॥उत्तमोदशभिर्द्रोणैःपंचभिर्मध्यमोमतः।त्रिभिःकनिष्ठो
राजेंद्रतिलशैलःप्रकीर्तितः॥इक्षुविष्कंभादिकंपूर्ववत्सर्वं।दानमंत्राः॥यस्मान्मधुवधेविष्णोर्दे राम०
हस्वेदसमुद्भवाः।तिलाःकुशाश्चमाषाश्चतस्माच्छंनोभवत्विह।हव्यकव्येषुयस्माच्चतिलैरेवाभि
रक्षणं।भवादुद्धरशैलेंद्रतिलाचलनमोस्तुते॥दानवाक्यं॥सकलपापक्षयदीर्घायुष्यपुत्र २८
पौत्रसमन्वितानंतरपितृदेवगंधर्वपूर्वकपूज्यमानत्वपूर्वकद्युलोकगमनसमनंतरक्षयपूर्वकप्यवे

ष्णवपदप्राप्तिकामइति॥ ॥अथार्द्रोदयव्रतेतिलपर्वतदानं॥ ॥स्कांदे॥पूर्वाह्णेसंगमेस्नात्वाशुचि
र्भूत्वासमाहितः॥सर्वपापविशुद्ध्यर्थंनियमस्थोभवेन्नरः॥नियममंत्रः॥त्रिदेवस्यव्रतेदेवाःकरि
ष्येभुक्तिमुक्तिदं।भवंतुसन्निधौमेघत्रयोदेवास्त्रयोग्नयइति॥ब्रह्मविष्णुशिवादीनांसौवर्णपल
संख्यया।प्रतिमास्तुप्रकर्तव्यास्तदर्धेनद्विजोत्तम।साग्रेशतत्रयेद्रोणानांतिलपर्वतमिति॥
यजमानोमध्याह्नेस्नात्वातिलपर्वतेमूर्तित्रयंपूजयेत्।तत्रादौब्रह्मपूजा॥नमोविश्वसृजेतुभ्यंस
त्यायपरमात्मने।देवायदेवपतयेयज्ञानांपतयेनमः॥ॐब्रह्मणेनमःपादौपूजयामि।हिरण्यगर्भा
य०ऊरूपू०परमात्मने०जंघे०वेधसे०गुल्फौ०पद्मोद्भवाय०हस्तौ०हंसवाहनायकटिं०शतानंदाय०
वक्षः०सावित्रीपतये०बाहू०ऋग्वेदाय०पूर्ववक्त्रं०यजुर्वेदाय०दक्षिणं०सामवेदाय०पश्चिमं०अथर्ववेदा
य०उत्तरं०चतुर्वक्त्राय०शिरः०हंसाय०कपोलौ०ततोलोकपालादिपूजनंतत्तन्मंत्रैः॥हिरण्यगर्भपुरुषप्र
धानाव्यक्तरूपतः।प्रसीदसुमुखोभूत्वापूजांगृह्णनमोस्तुते॥इतिप्रार्थ्यततोविष्णुपूजा॥ ॥अनंता
य०पादौ०विश्वरूपाय०ऊरूपू०मुकुंदाय०जानुनी०गोविंदा०जंघे०प्रद्युम्नाय०गुह्यं०पद्मनाभाय०नाभिं०
लंबोदराय०उदरं०कौस्तुभवक्षाय०वक्षः०चतुर्भुजाय०बाहू०विश्वतोमुखाय०मुखं०सहस्रशिर
से०मौलौ०आदित्यचंद्रनयनदिग्बाहोदेवसूदन।पूजांदत्तांमयाभक्त्यागृहाणकरुणाकरेतिप्रार्थ्यनो

दान॰ ततोशिवपूजा। महेश्वरमहेशाननमस्ते त्रिपुरांतक। नमो जीमूतकेशाय नमस्ते वृषभध्वज। ईशा
२५ नाय॰ पादौ॰ चंद्रशेखराय॰ जंघा॰ पशुपतये॰ जानु॰ शंकराय॰ ऊरू॰ उमाकांताय॰ गुल्फौ॰ नील
लोहिताय॰ नाभ्यां॰ कृत्तिवासेश्वराय॰ उदरं॰ नागोपवीतिने॰ वक्त्रं॰ रुद्राय॰ शिरः॰ अंधकारप्रमथा
य नमो लोकांतकाय च। पूजां दत्तां मया भक्त्या गृहाण वृषभध्वजेति पूजाक्रमः। ततो आचार्य सं
पूज्य पीठं छत्रं कमंडलुं श्वेतवस्त्रयुगं ब्रह्मणे॰ पीतवस्त्रयुगं विष्णोः॰ लोहितं शंकरस्य॰ ततो पंचामृ
तं॰ कमलैस्तुलसीपत्रैर्बिल्वपत्रैः संपूज्य ततो ब्रह्मविष्णुशिवानां नाममंत्रेणाष्टोत्तरशतं तिलहो
मः। होमांते गां दद्यात्। ततो पर्वतं सोपस्करं विप्राय दद्यात्॥ ॥इत्यर्धोदयव्रते तिलाचलदानं॥
अथ कार्पासाचलः॥ पाद्मे॥ कार्पासपर्वतस्तद्वत् विंशद्भारैरिहोदितः॥ दशभिर्मध्यमः प्रोक्तः कनिष्ठः
पंचभिः स्मृतः॥ अल्पधनो भारेणैकेन वा॥ विधिस्तु धान्यपर्वतवत्॥ दानं तु प्रभातायां शर्वर्यां
अरुणोदये सूर्योदयात्प्राक् इत्यर्थः॥ मंत्रः॥ त्वमेवावरणं यस्माल्लोकानामिह सर्वदा॥ कार्पासाचल राम॰
तस्मात्त्वमघौघध्वंसनो भवेति। दानवाक्यं॥ सकलपापक्षयपूर्वकल्पावधिरुद्रनिवासानंतर
भूलोकराजत्वकाम इति॥ ॥अथ घृताचलः॥ पाद्मे॥ विंशत्या घृतकुंभानामुत्तमः स्याद्घृताचलः॥ २५

मध्यमस्तु तदर्धेन तदर्धेनाधमः स्मृतः॥ अल्पवित्तस्तु कुर्यात्स्वल्पामेव कुर्वीत ताविष्कंभपर्वतांश्च
तुर्थांशेन कार्याः। कुंभः पलसहस्रात्मकः। घृतकुंभः पात्ररूप एव। शालितंडुलपात्राणि कुंभा
नामुपरि निवेशयेत्। संहताश्शुक्लवाससा वेष्टयेत्। इक्षुदंडफलान्वितः। शेषं धान्यपर्वतवत्स
र्वं॰ अरुणोदये गुरवे दद्यात्। संयोगाद्घृतमुत्पन्नं यस्मादमृततेजसः। तस्माद्घृतार्चिर्विश्वात्मा प्री
यतां मम शंकरः। यस्मात्तेजोमयं ब्रह्म घृते तच्च प्रतिष्ठितं। घृतपर्वतरूपेण तस्मान्नः पाहि भूधरे
ति मंत्रः॥ सकलपातकनाशनपूर्वकहंससारससंयुक्तकिंकिणीजालमाल्यपर्णवर्णविमानकरस्था
शंकरलोकगमनपूर्वकसिद्धविद्याधरार्चितत्वविस्पष्टपितृसहितभूतसंप्लवावधिकविवरण
कामेति दानवाक्यं॥ अथ रत्नाचलः॥ ॥अथातः संप्रवक्ष्यामि रत्नाचलमनुत्तमं॥ मुक्ताफल
ते सहस्रेण पर्वतः स्यात्तदुत्तमः॥ मध्यमः पंचशतिकस्त्रिशताधमः स्मृतः॥ चतुर्थांशेन विष्कं
भाः। वज्रगोमेदौ पूर्वे। दक्षिणे इंद्रनीलेति। पद्मरागयुतः सुपर्णश्च। वैदूर्यविद्रुमः॥ मंत्रः॥ य
थादेवगणाः सर्वे रत्नेष्ववस्थिताः॥ त्वं च रत्नमयो नित्यं नमस्तेऽपाहि मां सदा॥ यस्माद्रत्न
प्रसादेन वृष्टिं प्रकुरुते हरिः॥ महारत्नप्रसादेन तस्मान्नः पाहि सर्वतः॥ अत्रानेकजन्मकृत

Indira Gandhi National
Centre for the Arts

दान० ब्रह्महत्यादिपापक्षयोन्मामामरेश्वरपूजितत्वपूर्वकसाग्रकल्पशतावधिविष्णुलोकनिवासानंतरं स्व
२६ पारोग्यगुणोपेतसप्तद्वीपावधिकाम इति दानवाक्यं॥ अथ रौप्याचलः॥ ॥पाद्मे॥ दशभिः पलसा
हस्रैरुत्तमो राजताचलः॥ पंचभिर्मध्यमः प्रोक्तस्तदर्धेनाधमः स्मृतः॥ अशक्तो विंशतेरूर्ध्वं विष्कंभा
त्करीयांशेनेति। शेषं पूर्ववत्॥ मंत्रः॥ पितॄणां वल्लभं यस्माद्धर्मेंद्रोः शंकरस्य च। रजतं पाहि तस्मान्न
च्छोकसंसारसागरात्॥ ॥अत्र सकलपापक्षयदशसहस्रगोदानफलावाप्तिपूर्वकगंधर्वाप्सरोग
णपूज्यमानत्वविशिष्टयावदाभूतसंप्लवसोमलोके निवासकाम इति दानवाक्यं॥ ॥अथ शर्कराच
लः॥ ॥अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः। चतुर्भिर्मध्यमस्तद्वत्तदर्धेनाधमः स्मृतः॥ भा
रेण वार्धभारेण स्वल्पवित्तवान्कुर्यात्। चतुर्थांशेन विष्कंभः। मंदारपारिजातककल्पवृक्षादयो
हैमाः पूर्ववत्। पूर्वपश्चिमे हरिचंदनौ। धनदादङ्कुरो गंधमादने। प्राग्वो वेदमूर्त्तिर्विपुलाचले। हे
मी सुपार्श्वे। दक्षिणाभिमुखी सुरभी। शेषं धान्यपर्वतवत्। अत्र मंत्रः। आरोग्यामृतसारायपर
मः शर्कराचलः॥ तन्ममानंदकारी त्वं भव शैलेंद्र सर्वदा॥ अमृतं पिबतां ये तु निपेतुर्भुवि सीकराः। राम०
देवानां तत्समुत्थोयं पाहि नः शर्कराचलः॥ नमो भवधनुर्मध्याद्गडूतायतः। तन्मयोसि महाशो २६

लपाहि संसारसागरात्। अत्र सकलदुरितक्षयकामानंतरं कल्पशतावधिकविष्णुलोकनिवा
सानंतरं सप्तद्वीपाधिपत्योत्तरजन्मायुतत्रयावच्छिन्नायुरारोग्यकाम इति दानवाक्यं॥ सर्वत्राक्षा
रलवणमश्नीयात्। ब्राह्मणभोजनं सर्वत्र शक्त्या कार्यमेव। दाता पूर्वेद्युः कृतोपवासोपरेद्युर्दाना
नंतरं अक्षारलवणं भुंजीत। एवं प्रसन्नचित्तः कुर्वीत॥ ॥इति शर्कराचलदानं॥ ॥अथ शिखर
दानं॥ विष्णुधर्मोत्तरे॥ गुडघृतवस्त्रलवणधान्यकजातिशर्करा। खर्जूरतंडुलद्राक्षाक्षोडमलय
जेन च॥ पुष्पैर्मनोहरै रम्यैः शिखराणि प्रदापयेत्। माघमार्गशीर्षवैशाखरोहिणीयुतायां तृतीया
यां प्रोष्ठपदे शुक्ले तृतीयायां वा दद्यात्॥ शिखरप्रमाणं तु आत्मप्रमाणं प्रादेशाभ्यधिकं शरी
रार्धप्रमाणं सप्रादेशं वा॥ प्रयोगः। यजमान उक्तकाले पूर्वेद्युर्गणेशपूजादिनांदीश्राद्धांतं कृ
त्वा अद्येत्यादि दौर्भाग्यदौर्गत्यपराभवपूर्वककल्पकोटिशतत्रयावच्छिन्नगौरीभवननिवासानं
तरं पृथिवीपतित्वकामः अमुकगुडशिखरदानमहं करिष्ये। इति संकल्प्याचार्यं वृत्वा लिप्तायां भू
मौ विष्णुपत्राणि संस्तीर्य मंडले द्विहस्तविस्तारं उपरि हस्तमात्रविस्तारं इक्षुमयकुसूलं कृत्वा
तदभ्यंतरे रक्तवस्त्रेणावेष्ट्य गुडादिदेयद्रव्येणापूर्य परित इक्षुपत्रकटमास्तीर्य तत्र क्षौमादिव

Indira Gandhi National Centre for the Arts

दान॰ स्त्रोपरिखंडेंदुवर्णाभांवेदमौलिंपद्मासना॥ क्षसूत्रकमंडलुवरदाभयकरांगौरीं हेमांसशिखरांस्तत्रे
२७ णावेष्ट्यकुंकुमादिनापूजयेत्॥ भवान्यै॰ पादौ॰ कामिन्यै॰ जानु॰ कामेश्वर्यै॰ ऊरू॰ जगत्प्रियायै॰ ना
भौ॰ आनंदायै॰ हृदयं॰ नंदायै॰ स्तनौ॰ ~~सुक्षमायै~~ सुभगायै॰ मुखं॰ ललितायै॰ शिरः॰ संपूज्यपुष्पां
जलिमादायत्रिःप्रदक्षिणीकृत्यपठेत्॥ यस्मान्निवासःपार्वत्याःशिखरत्वंसुरेश्वरः॥ तस्मान्मां
पाहिभगवन्त्वंगौरीशिखरःसदेतिपुष्पांजलिंप्रक्षिप्यनमस्कृत्यजागरणंकुर्यात्॥ ततःप्रभा
तेशिखरपश्चिमभागेउपविश्य अद्येत्यादिपूर्ववदुच्चार्य इदंशिखरंगौरीप्रतिमायुतंसंप्रददे
तिदत्वासुवर्णदक्षिणांदत्वाविप्रान्संभोज्यतद्दिनेक्षीरंघृतंवावाम्यत्तोमुक्तकेशःप्राश्नीयात्॥
दक्षकवस्त्रादिशिखरस्थानेसंकल्पादौतत्तत्प्रयोगइतिविशेषः॥ शेषंपूर्ववत्॥ ॥इतिगुडपदि
शिखरदानं॥ ॥अथशूलदानं॥ ॥वायुपुराणे॥ ॥कृष्णपक्षेचतुर्दश्यामष्टम्यांवासितेनरः॥ कुर्या
द्वादशनिष्काणांत्रिशूलंलवणान्वितं॥ सौवर्णमात्रेनिष्कश्चतुष्कःसौवर्णिकःषट्पंचाशदधिकशतत्र
द्वयपलमूल्योवत्तिपक्षत्रयंशतंयाज्ञेयं॥ नाभौनिधायसंपूर्णंतिलानांताम्रनिर्मितं॥ पात्रमष्ट राम॰
कसमानंतत्रशूलंन्यसेत्पुनः॥ तन्नैवमंत्रेणतस्यपूजांकुर्यान्नरःत्वेनैवशूलायेतिमंत्रः॥ विश्वरू २७

पार्श्वेहैमंकमलोपरिसंपूज्य अघोरेतिमंत्रेणप्रतिपद्यततोविप्रंसंपूज्यअनेनमंत्रेणप्रदक्षिणंकुर्या
त्॥ भगव भगनेत्रघ्नदक्षयज्ञप्रमर्दन॥ त्वयायुधप्रदातेनपापंनश्यतुशंकर॥ यगांतेयेनलोकानांत्व
मंतकविनाशन॥ विदग्धंतत्त्वपापेनतेनपापंव्यपोहय॥ येनदग्धंक्षणार्धेनत्रिपुरंसुरदुर्जयं॥ तेनपा
शुपतेनाशुममपापंविनाशय॥ यदिबुद्धिकृतंपापंममवाक्कायमानसं॥ तत्सर्वंक्षयमाप्नोतुतव
शूलप्रदानतः॥ इत्याम अदानेद्यानं॥ ॥अथधननंदमूर्तिदानं॥ ॥वायवीये॥ पलार्धेनतदर्धे
नतदर्धार्धेनवापुनः॥ सार्धमाषद्वयाधिकांपंचाशन्माषावधिकांकुबेरमूर्तिपुष्पकविमानस्थां
पार्श्वयोःपद्मशंखाकारयुतांकृत्वा अद्येत्यादियथेष्टधनकामोहंधनदमूर्तिदानंकरिष्यइतिश्वेत
वस्त्रांमूर्तिंयथाशक्तिएकद्विचतुर्द्रोणतंडुलराशौनिधायसंपूज्यआग्नेयामग्निंसंस्थाप्यसमिदा
ज्यचरुभिःप्रत्येकमष्टाविंशत्यादिसंख्ययाराजाधिराजायेतिमंत्रेणव्याहृतिभिश्चतिलैर्हुत्वा
धनदपूजांकृत्वाप्रार्थयेत्॥ ॥नरराजापतेदेवकुबेरनरवाहन॥ पद्मशंखनिधीनांत्वंपतिश्री
कंठवल्लभा॥ दानाद्येनमयाप्राप्तंदारिद्र्यंममदुःखदं॥ तेसर्वेममदानेनपापमाशुविनाशयेति
॥ ॥अद्येत्यादिइमांधनदमूर्तिंदारिद्र्यनाशकामोमुकशर्मणेसंप्रददे॥ देयद्रव्यत्तनीयांशंचतुर्था
कामेश्वरोवैश्रवणोद
राजाधिराजायप्रस[illegible]ह्यसाहिनेनमोवयंवैश्रवणायकुर्महे। समेकामान्कामकामायमह्यं।
दातु। कुबेरायवैश्रवणायमहाराजायनमः॥
स ह्य

Indira Gandhi National Centre for the Arts

दान० शं सुवर्णं दक्षिणेति॥ ॥इति धनदमूर्त्तिदानं॥ ॥अथ शालग्रामदानं॥ ॥शालग्रामशिलां चक्रे
२८ यो दद्याद्दानमुत्तमं॥ भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं इति पाद्मे॥ मंत्रः॥ महाकोशनिवासेन च
क्राग्निरूपशोभितः। अस्य देवस्य दानेन मम संतु मनोरथाः॥ ॥अथ कालपुरुषदानं॥ भविष्ये॥ देयं
निष्कशतं पार्थ दानेषु विधिरुत्तमः॥ मध्यमस्तु तदर्धेन तदर्धेनावरः स्मृतः। अशक्तेन पंचसौवर्णि
कः। ततोल्पेन प्रतिग्रहीता दुःखशोकावृतः स्यात्। चतुर्थ्यां तु चतुर्दश्यां भद्राकरणे वा कुर्यात्॥ सौप्यदर्श
नं सुवर्णनेत्रं खड्गोद्यतकरं मांसपिंडयुतवामकरं जपाकुसुमकुंडलं रक्तस्रग्विणं शंखमालाधरं क्षुरि
कायुतकटिदेशं अतिदीर्घं कृष्णाजिनयुतं। निर्माय। अद्येत्यादि अपमृत्युव्याधिसर्वबाधानिवारणार्थं
तैश्वर्यप्राप्तिमरणोत्तरमयदकाम आधर्म श्री पुत्रपौत्रादिकलत्रराज्यकामः कालपुरुषदानं करिष्ये
इति संकल्प्य कालपुरुषं विप्रं च संपूज्य पुष्पांजलिं गृहीत्वा वदेत्। सर्वे कलयसे यस्मात्कालस्तेन चो
च्यते। ब्रह्मविष्णुशिवादीनां त्वमसाध्योसि सुव्रत। अजितस्त्वं यथा शास्त्रात्पार्थिव जय यथा सुखं। पद्म
ध्यानेन च विभो नमः इति मंत्रः। अद्येत्यादि अपमृत्युव्याध्यादिकामातं स्वर्णाक्षं संकल्प्य इमं कालपु दान०
रुषं सोपस्करं गोत्रायामुकशर्मणे संप्रददे। दत्त्वा पंचसुवर्णादूर्ध्वं आनिष्कशतं दक्षिणां दत्त्वा भूयसी २८

दानं विप्रभोजनादि कुर्यात्॥ ॥इति कालपुरुषदानं॥ ॥अथ कालचक्रदानं॥ मत्स्यकं जये॥ अ
द्येत्यादि अपमृत्युनिवारणकामः कालचक्रदानं करिष्ये॥ इति संकल्प्य शक्तितो रूप्यकृतं च
क्राकारमनेकमुक्तामालालंकरणयुतं कालचक्रं विप्रं च संपूज्य। मंत्रः॥ इमं ते राजतं चक्रं रश्मि
जालसमाकुलं। अपमृत्युविनाशाय ददामीति समुच्चरन्। इदं कालचक्रं मुक्तादामयुतं अप
मृत्युनिवारणकामोऽमुकशर्मणे संप्रददे इति सुवर्णदक्षिणां दत्त्वा गृंसेस्छप्यकालचक्राय स्वा
मृत्युनिवारणकामो। सक्रं अक्षारलवणं संकुजीतेति॥ मत्स्यके ज
हेत्यष्टोत्तरशतं तिलैर्हुत्वा द्वादश विप्रान्भोजयित्वा स्वयं अक्षारलवणं संकुजीतेति॥ मत्स्यके
ये॥ लोहपात्रे स्थितं कांस्यं तत्र पद्मं तु राजतं॥ तस्मिन्कालेश्वरः स्वर्णः पुरुषाकारतां गतः। रूपं ईष
त्पीतो दंडहस्तः रक्तेदृक्पाशभृत्तु ऊर्द्ध्वं। वस्त्रालंकारसंयुक्तः अभयप्रदः त्रिलोहाकारे दंते युक्तः
त्रिलोहं कांस्यताम्रपित्तलाख्यं। पुरुषाकारे हृते दृढहस्ते। वामहिषपृष्ठे अष्टम्यां चतुर्दश्यां
दद्यात्॥ दक्षिणा घृतघटः सुवर्णं वा॥ एवं कृते नाशाद्ध्रुवं मुच्यते। नाशो मृत्युः॥ ॥इति यमदा
नं॥ ॥अथ सप्तकरदानं॥ ब्रह्मांडे॥ सूर्यग्रहणादिके शुभे दिने देवायतनादिके गृहे वा कार्यं॥ पा

दान० तः तिलकुशमिश्रोदकेन स्नात्वा । अद्येत्यादि संपदायुरारोग्य पापनाश पुत्रादि कुलवृद्धि स्वर्ग
२९ मोक्षप्रसिद्धिकाम मित्रादि प्रतिमादानं करिष्य इति संकल्प्य गुरुं कृत्वा विंशद्धस्तां चतुरस्त्रां भुवं
भुवं गोमयेनोपलिप्य तत्र प्रागायताश्वेतस्त्रा रेखा लिखित्वा तेषु नव कोष्ठेषु तंडुलान्निक्षिप्य तेषु नव
कुंभान्नववस्त्रान्संस्थाप्य तेषु सुवर्णत्रयादूर्ध्वं पलावधि हेम्ना कृताः प्रतिमाः स्थाप्य पूजयेत् । तत्र पश्चिम
कुंभ ... संस्थानूमित्रे ... सोमं मध्यमपंक्तौ चतुर्भुजं विष्णुं उमापतिं अंत्यपंक्तौ दिवाकरं वृत्रहणं
पंक्तौ उदकुंभस्थानू मित्रेरूण सोमं मध्यमपंक्तौ ... अमुकशर्मणे मां प्रति
वृद्धिश । ततो नवविप्रान्संपूज्य कस्मै अद्येत्यादि संपदादिकामां ते पूर्वोक्त फलमुक्त्वा अमुकशर्मणे मां प्रति
मां संप्रददे इति दद्यात् ॥ वरुणप्रतिमां गुरवे देयं ... सुवर्णसमेवस्त्रयुगं भूयसीं च दद्यात् ॥ इति संपल्क
रदानं ॥ ॥ अथ कृष्णाजिनदानं ॥ सौरे ॥ कृष्णाजिनं च महिषी च दशधेनवः । ब्रह्मलोकप्रदा मीतुलु ला
पुरुष एव च ॥ मात्स्ये ॥ वैशाखी पूर्णिमासा तु ग्रहणं शशिसूर्ययोः । पौर्णमासी तु या माघे आषाढी कार्त्ति
कीतथा ॥ उत्तरायणे द्वादशी वा तस्यां दत्तं महाफलं ॥ प्रयोगः ॥ उक्तकाले गोमयेनोपलिप्ते देशे आविके दान०
कंबले तदुपरि सशृंगसखुरं प्राचीवं कृष्णाजिनमास्तीर्य सुवर्णशृंगी रौप्यदंतीं मौक्तिक पुच्छं सुवर्णेना २९
नं कृत्वा तत्पर्याप्त प्रमाणान् तिलान् संस्थाप्य वाससा संछाद्य सगंधरत्नानि वत्वारि पात्राणि कांस्य

स्य घृत दुग्ध दधि मधु युतानि चत्वारि च दद्यात् प्रागादि दिक्षु रात्रदेशाद्भिः वेपक शार्यां मंत्रेण कुं ने
वसं स्थाप्य देशकालादि स्मृत्वा ब्रह्मलोकवाप्तिकामः सप्तजन्मोपात्त पापनाशकामः पितृपुत्र
परिवार भार्या धन देशाद्य भोगकाम इष्टकामः कृष्णाजिनदानं करिष्य इति संकल्प्य जीर्णपीत
वास सास्त्वांगानि संमृज्य यानि कान्यानि पापानि मया लोभात्कृतानि च । लोहपात्र प्रदानेन प्रनश्यं
तु यमाशु वै ॥ इति मंत्रेण सतिलं लोहपात्रं कृष्णाजिनस्य वामे पादे निवेशयेत् । यानि कानि च पा
पानि कर्णोत्थानि कृतानि च । कांस्यपात्र प्रदानेन तानि नश्यंतु मे सदा इति । मधुमयं कांस्यं दक्षिणे ।
परापवादपैशून्याद्वृथा मांसस्य भक्षणात् । ततोत्थितं च मे पापं ताम्रपात्रात्प्रणश्यतु । सा । लेति
ताम्रपात्रं वामहस्ते । कन्यानृतं गवां चैव परदाराप्रधर्षणं । रौप्यपात्र प्रदानेन क्षिप्रं नाशं प्रयातु
मे इति मधुरौप्यपात्रं दक्षिणहस्ते ॥ जन्मजन्मसहस्रेषु कृतं पापं कुबुद्धिना । सुवर्णपात्र दानात्तु नाश
याशु जनार्दन इति साक्षतं हेमपात्रं मध्ये हेम मुक्ता विद्रुम दाडिम मातुलिंगानि निधाय पत्रपत्रे क
र्णयोः संस्थाप्य वस्त्रादिना विप्रं संपूज्य देशकालौ संकीर्त्य अमुकशर्मणे तुभ्यं कृष्णाजिनं पूर्वोक्त
सोपस्करं वृषभध्वज प्रीतये संप्रददे । एतद्दक्षिणा । गारुडे । शतनिष्का तदर्धा वा तदर्धार्धा न तान्यूना

Indira Gandhi National
Centre for the Arts

४ सीवू प्यवाक्येनवक्ष्यमाणस्नामग्र्यासंपाद्यतदुपरि लक्ष्मीनारायणप्रतिमामंगनुमारण पूर्वके स्थापयित्वा सं का पादिकु
प्राकशिरस्कामुदक्शिरस्कां वा संस्थाप्य

दान० ३० नेत्यधिकेफलं। अस्वस्थ्यः सद्विजो राजन् विन्नारूप समोहि सः। दाने वस्राऊकाळेव दूरतः परिवर्जयेदित्तिग
रुडोक्तः। स्वगृहो प्रेष्यते विप्रं मंडले स्नानमाचरेत्। तद्रूप्यकुंभसहितं नीलाक्षेप्यं चतुष्पथेति। अनेन
ऋषिष्ठनासमयमनुमिदानफलं चेति॥ ॥इतिकृष्णाजिनदानं॥ ॥अथशय्यादानं॥ भारते॥ अष्टदले
तिलप्रस्थं तस्मिन्नस्तीर्णां शय्यां तस्याः समंतात् संकल्पवाक्येन वक्ष्यमाणान् कुंभान् संस्थाप्य॥ अद्ये
त्यादि सर्वपापक्षयपूर्वकाप्सरोगणसेव्ययुतविमानकरणकेंद्रपुरगमनोत्तरषष्टिसहस्रवर्षनंदधिक
रणकं क्रीडनस्त्रीसहस्रसंवरणसहितस्वर्गलोकमहितत्वतदुत्तरषष्टियोजनमंडलराज्यानंतरशिवे
कृकामः शय्यांदास्ये इतिसंकल्प्य सपलिकं विप्रं संपूज्य शय्यां तदुपरि लक्ष्मीनारायणप्रतिमां संर
ज्यप्रदक्षिणीकृत्य नमः प्रमाण्ये दद्यात्ति चतुर्दिक्षु प्रणम्यतिथ्यासुवत्स्य सर्वपापक्षयेति पूर्वोक्तमनु
स्कामुकशर्मणे मां शय्यां ईशानादि दिक्कोणचतुष्टयस्थापितघृतकुंभगोधूमजलपूर्णपात्रीमुष्टीर्षकत्र
दृशस्थापितां घृतपूर्णकलशां हंसतूलीप्रच्छन्नां शुभगंडोपधानकां प्रच्छादनपटीसंबधान्वितां बृहदादर्श
कुंकुमक्षोदकर्पूरागरुचंदनदीपिकोपानच्छत्रचामरासनभोजनजलपात्रपंचवर्णवितानलक्ष्मीना
रायणप्रतिमायुतां आंगिरोदैवतां अमुक मां हं संप्रददे। शय्यापवेशितविप्रहस्ते कुशोरकं क्षिप
उत्तानां नममति

पयानकृ यथा ... कं वल्याशि वृहस्पतच। श॥ ततो विप्रः शय्या मुपाद्य ... ललो त्पु का ना मस्तु ति प ... 
मानिपत्र विप्रं विप्र ... यपदशा शा के ब्राह्मण भोजयित्वा स्वयं भुंजीत ॥

तां मंत्रः॥ यथानकृष्णशयनं शून्यं सागरकन्यया। शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि॥ ततो दि
रण्यं दक्षिणां देया॥ ॥इतिशय्यादानं॥ ॥अथवस्त्रदानं॥ नंदिपुराणे॥ वस्त्रयुग्मं प्रार्थने दद्यात् कुंभं वापि
यदृच्छया। स भवेद्धनवान् श्रीमान् बृहस्पतिपुरे वसेत्। विष्णुधर्मे॥ वासो हि सर्वदैवत्यं सर्वप्रायोज्यमुच्य
ते॥ वस्त्रदाना स्कृवेषः स्याद्रूपद्रविणसंयुतः॥ युक्तो लावण्य सौभाग्ये विरागश्च तथा द्विजः। दत्वा कार्पासि
कं वस्त्रं स्वर्गलोके महीयते॥ दत्वा सरोमं तत्रापि फलं दशगुणं भवेत्॥ ॥अथपात्रदानं॥ वाराहे॥ अथा
तः संप्रवक्ष्यामि पात्रदानमनुत्तमं। दत्वा ताम्रमयं पात्रं यथाविभवविस्तरं। तत्पात्रे हैमीं उमया सह हरं
संपूज्य नामगोत्रैः स्वाचार्यं दद्यात्॥ ॥अथस्थालीदानं॥ भविष्ये॥ कृत्वा ताम्रमयीं स्था
लीं पलानां पंचभिः शतैः। अशक्तस्तु तदर्धेन चतुर्थांशेन वा पुनः। तद्दशांशेन मन्मेयी। पायसेन पूर्णां
घृतपात्रयुतां उदकपात्रयुतां शाकपात्रयुतां सवस्त्रां मंडले स्थाप्याभ्यर्च्य। आदित्ये हनि संक्रांतौ अष्ट
मी वा चतुर्दशी। एकादश्यां तृतीयायां विप्राय दद्यात्॥ शक्त्या सुवर्णदक्षिणेति॥ ॥अथपुराणदानानि॥ ॥ रामाय
अष्टादशपुराणानि सहिरण्यानि पार्वति॥ लिखित्वा यः प्रयच्छेत् स विद्यापारगो भवेदिति॥ ॥रामाय
णं भारतं च दत्वा स्वर्गे महीयते। धर्मशास्त्रं ततो दत्वा स्वर्गलोके महीयतेति वाराहोक्तेः। पुस्तकं विप्रं च
संपूज्य दद्यात् सुवर्णं दक्षिणा॥ अत्रोंकारो देवता च भविष्ये॥ धेनुदानसहस्रेण सम्यग्दत्तेन यत्फलं॥

Indira Gandhi National Centre for the Arts

दान० तत्फलं समवाप्नोति पुस्तकैकप्रदानतः इति॥ इति पुस्तकदानं॥ छत्रदानं पाद्मे॥ असिपत्रवने मार्गे क्षु
३१ रधारासमन्विते॥ तीक्ष्णातापं च न पतिच्छत्रोपानत्प्रदानतः इति॥ ॥अन्नदानं स्कांदे॥ अन्नरः प्राण
दः प्रोक्तः प्राणश्चापि सर्वदः॥ तस्मादन्नप्रदानेन सर्वदानफलं लभेत्॥ भविष्ये॥ तांबूलयो नरो द
द्यात्सम्यङ्नियमान्वितः॥ देवेभ्योथ द्विजातिभ्यः स महाभाग्यमश्नुते॥ इति तांबूलदानं॥ ॥अथ गल
तिकादानं॥ ॥भविष्ये॥ वसंतसमये प्राप्ते गत्वा देवालयं वरं॥ शिवस्य विष्णोरर्कस्य इष्टदेवस्य वा पुनः
॥ ॐ नमः शंकरः शंभुर्भवो धाता शिवो हरः॥ प्रीयतां मम हृद्देव जलकुंभप्रदानतः॥ ततो विप्रान्संपूज्य
शक्त्या बंधुभिः सह स्वयं भुंजीतेति॥ त्रयाणामपि लोकानामुदकं जीवनं स्मृतं॥ पवित्रममृतं यस्मात्तद्दे
यं पुण्यमिच्छता॥ ॥इति स्कंदपुराणे गलंतिकाव्रतं संपूर्णं॥ ॥अथ प्रपादानं॥ ॥भविष्ये॥ ॥अती
ते फाल्गुने मासि प्राप्ते चैत्रे महोत्सवे॥ पुण्ये ह्नि विप्रकथिते मंडपं कारयेत्ततः॥ पुरमध्ये पथि चैत्यवृक्षत
ले वा प्रपां कारयित्वा तन्मध्ये सौगंधकान् जलकुंभान् स्थाप्य प्रपापालकं बहुपुत्रं स्थाप्य प्रार्थयेत्॥ प्रप दाम०
यं सर्वसामान्यभूतेभ्यः प्रतिपादिता॥ अस्याः प्रदानात्तृप्यंतु पितरोथ पितामहाः॥ अनिवारितं ततो ३२
देयं जलं मासचतुष्टयं॥ त्रिपक्षं वा महाराजंजीवानां जीवनं परं॥ प्रत्यहं कारयेत्तस्यां भोजनं शक्तितो
प्रसाद्यं तं कारयेत्कुंभं ... देवस्य स्तके॥ एवं मासचतुष्टयं दत्वा कर्तिके देवं संपूज्य ततो मंत्रः ई

द्विजान्॥ अनेन विधिना यस्तु ग्रीष्मतापप्रणाशनं॥ पानीयमुत्तमं दद्यात्तस्य पुण्यफलं शृणु॥ कपि
लाशतदानस्य सम्यग्दत्तस्य यत्फलं॥ तत्पुण्यफलमाप्नोति सर्वदेवैः सुपूजितः॥ इति प्रपादानं॥ ॥
तथा भविष्ये॥ ॥अग्निदानं हेमंतशिशिरर्त्वोः सुरालयमठे देवालये अग्निप्रज्वालनेन षष्टि
वर्षसहस्राणि ब्रह्मलोके महीयते॥ संवर्तः॥ देवागारे द्विजागारे दीपं दत्वा चतुष्पथे॥ मेधावी ज्ञान
संपन्नश्चक्षुष्मांश्च सदा भवेत्॥ नारायणे दीपदानं अतिप्रशस्तं॥ ॥इति दीपदानं॥ ॥पांथपरि
चर्या॥ स्कंदे॥ शयनासनभोजनैः॥ स स्वल्पेन प्रयासेन जयति क्रतुयाजिनं॥ इति पांथोपचारः॥ अथ
गोपरिचर्या॥ ॥विष्णुः॥ गवां कंडूयनं चैव सर्वकल्मषनाशनं॥ गवां ग्रासप्रदानेन स्वर्गलोके महीयते॥
अथ धर्मघटदानं॥ ॥विष्णुः॥ शीतलेन सुगंधेन वारिणा पूरितं घटं॥ शुक्लचंदनदिग्धांगं पुष्प
दामोपशोभितं॥ दध्योदनभृतं कुर्यात् शरावं तस्य चोपरि॥ उपानच्छत्रसंयुक्तं धर्मार्थं कल्पये
द्घटं॥ पुष्पाक्षतं गृहीत्वा तु इमं मंत्रमुदीरयेत्॥ ॐ नमो विष्णुरूपाय नमः सागरसंभव॥ अपां
पूर्णो द्धरास्मान्त्वं दुःखसंसारसागरात्॥ ॥प्रार्थना॥ ॥उदकुंभोमया दत्तो ग्रीष्मकाले दिने

Indira Gandhi National
Centre for the Arts

दान० दिने॥ उदकुंभप्रदानेन प्रीयतांमधुसूदनः॥ देवस्येत्वेतिमंत्रेणदद्यात्॥ भविष्ये॥ प्रत्यहधर्मघटको
३२ वस्त्रसंवेष्टितोनवः॥ ब्राह्मणस्यगृहेदेयः शीतामलजलः शुचिः॥ वसंतग्रीष्मयोर्मध्येयः पानी
यंप्रयच्छति॥ पलेपलेसुवर्णस्यफलंप्राप्नोतिमानवः॥ मार्गशीर्षात्समारभ्यउदकुंभंतुयःक्षिपेत्॥
दिनेदिनेसहस्रस्यगवांपुण्यफलंलभेत्॥ तस्योद्यापनंमासिमासिकार्यं॥ मंडकाःविष्टकसुक्ता
श्चापक्वान्नैःसार्वकामिकैः॥ उद्दिश्ययशंकरंविष्णुंब्रह्माणमथवापितृन्॥ सतिलैर्वास्यानेनमंत्रेणद
द्यात्॥ एषधर्मघटोदत्तोइतिमंत्रः॥ अनेनविधिनायस्तुधर्मकुंभंप्रयच्छति॥ वसंतग्रीष्मसमयेगो
प्रदानफलंलभेदितिधर्मघटदानं॥ ॥ बौधायनः॥ यज्ञोपवीतदानं॥ ॥अथमासदानानि॥ माघे
तिलदानंयाम्यलोककामः॥ फाल्गुनेप्रियंगुदानात्प्रियोभवति॥ चैत्रेविचित्रवस्त्रदानात्सौभाग्यकामः।
वैशाखेअपूपदानात्कर्पूरदानात्स्वर्गं॥ ज्येष्ठेछत्रदानात्सर्वान्कामान्॥ आषाढेचंदनदानात्कर्पूरदा
नाच्चमहाफलं॥ श्रावणेवस्त्रदानान्महत्फलं॥ भाद्रेपणितदानेमहाफलं॥ आश्विनेघृतदानेनरूपवान्। दान०
नारिकेलदीपदानेनसर्वतोज्वलप्रकाशवानिसर्थः॥ मार्गशीर्षेलवणदत्वासौभाग्यवान्। पौषेकांचनदाने ३२

नतुष्टिवान्। एषुमासेषुशुक्लपक्षेषुप्रदानाल्लक्ष्मीवान्॥ कृष्णेफलदानान्महाफलं॥ ॥अथअधि
मासदानं॥ ॥तत्रहेमाद्रौपाद्मे॥ अधिमासेतुसंप्राप्तेगुडसर्पियुतानिच॥ त्रयस्त्रिंशदपूपानिदद्या
त्प्रत्यहंनिदिनेदिने॥ साज्यानिदधिमिश्राणि अधिमासेनृपोत्तमेतितथा॥ अधिमासेतुसंप्राप्तेत्र
यस्त्रिंशत्तुदेवताःउद्दिश्यापूपदानेनपृथ्वीदानफलंलभेत्॥ त्रयस्त्रिंशदपूपानिकांस्यपात्रेनिधाय
चसघृतंसहिरण्यंचब्राह्मणायनिवेदयेत्॥ दानवाक्यं॥ अद्येत्यादिअमुकगोत्रायामुकशर्मणेब्रा
ह्मणायगंधपुष्पाद्यर्चितायत्रयस्त्रिंशदपूपान्वितंकांस्यपात्रंसघृतंसहिरण्यंतुभ्यमहंसंप्रददे॥
वि त्तिदत्वावदेत्अमलानांचविशुध्यर्थंपापप्रशमनायच॥ पुत्रपौत्राभिवृध्यर्थंतवदास्यामिभास्कर। वि
ष्णुरूपीसहस्रांशुःसर्वपापप्रनाशनः॥ अपूपान्नप्रदानेनममपापंव्यपोहतु॥ इति॥ देवस्यत्वेतिमंत्रे
णपठित्वादद्यात्॥ ततोविष्णुवसंप्रार्थयेत्॥ नारायणजगद्बीजभास्करप्रतिरूपक। दानेनपुत्रांश्चसंप
दंचाभिवर्धय॥ यस्यहस्तेगदाचक्रेगरुडोयस्यवाहनः। शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु। कला
काष्ठादिरूपेणनिमेषघटिकादिना॥ योवंचयतिभूतानितस्मैकालात्मनेनमः॥ कुरुक्षेत्रमयंदेशःका
लःपर्वद्विजोहरिः॥ पृथ्वीसममिमंदानंगृहाणपुरुषोत्तमेति। ततोयथाशक्तिदक्षिणांदद्यात्। मंत्रेण

दान० नेनयोदद्यात्रयस्त्रिंशदपूपकान्॥ प्राप्नोतिविपुलांलक्ष्मींपुत्रपौत्रादिसंपदामिति॥ ॥इत्यधिमासदानं
३२ ॥संक्रांतिविशेषेदानविशेषमाह॥ विश्वामित्रः॥ मेषसंक्रमणेभानोर्मेषदानंमहाफलं॥ वृषसंक्रमणे
दानंगवांप्रोक्तंतथैवच॥ वस्त्रान्नपानदानानिमिथुनेविहितानितु। घृतधेनुप्रदानंतुकर्कटेचप्रशस्य
ते। सुवर्णपात्रदानंचसिंहेचविहितंसदा। कन्याप्रवेशेवस्त्राणांसुरभीणांतथैवच। तुलाप्रवेशेधान्या
नांबीजानामेवचोत्तमं। कीटप्रवेशेवस्त्राणांवेश्मनांदानमेवच। कीटोवृश्चिकः। धनुःप्रवेशेवस्त्रा न५
णांयानानांचमहाफलं। मकरप्रवेशेदारूणांदानमग्नेश्चवाहनं॥ कुंभप्रवेशेदानंतुगवांमंबुतृण
स्यच। मीनप्रवेशेत्वन्नस्यमीनानामपिचोत्तममिति। दानान्यथैतानिमयाद्विजेंद्राः प्रोक्तानिकाले
तुनरःप्रदत्त्वाप्राप्नोतिकामंमनसस्त्वभीष्टंतस्मात्प्रशंसंतिहिकालदानमिति॥ अत्रकालःसम
ब्रह्म० ३४ यः॥ ॥अथग्रहदानं॥ ब्रह्मोवाच॥ ग्रहदानक्रमंवक्ष्येसर्वसिद्धिकरंपरं॥ सर्वशांतिकरंनृणां
सर्वपापप्रणाशनं॥ अयनेविषुवेग्रहणद्वयेजन्मर्क्षेसौरवारेपंचदश्यांपुण्यकालेपुण्यदेशेषुदा दान०
नेकार्यं। हस्तत्रंद्वित्रिहस्तांवाभूमिंगोमयेनोपलिप्यनवकोष्ठेषुतंडुलैःपद्मानिकृत्वानिष्कत्रयेण
यथाशक्त्यावासुवर्णप्रतिमांआदित्यादिग्रहादीनांकृत्वा। आदित्यंमध्यमकोष्ठेभौमंदक्षि ३२
रक्तेनफलेन

पद्मेषगमोगदाभृत्तांधरासुतःशक्तिधरश्चशूलीसदाममस्याद्वरदःप्रशांतः॥३॥ पीतांबरःपीतवपुःकिरीटीचतुर्भुजो
दंडधरश्चहारी। चर्मासिधृक्सोमसुतःसिंहाधिरूढोवरदोबुधोस्तु॥४॥ पीतांबरःपीतवपुःकिरीटीचतुर्भुजो
णेउत्तरेगुरुंबुधंईशानेशुक्रंपूर्वेचंद्रंआग्नेयेपश्चिमेशनिंनिर्ऋतौराहुंवायव्येकेतुंइत्यादीन्ग्रहं
धपुष्पाद्यैस्ततन्मंत्रैःपूजयेत्॥ ततोविप्रांश्चतत्तन्मंत्रैर्दद्यात्॥ मंत्राश्च। पद्मासनःपद्मकरोद्वि
बाहुःपद्मद्युतिःसप्ततुरंगवाहः॥ दिवाकरोलोकगुरुःकिरीटीमयिप्रसादंविदधातुदेवः॥ श्वे
तांबरःश्वेतविभूषणश्चश्वेतद्युतिर्दंडकरोद्विबाहुः। चंद्रोमृतात्मावरदःकिरीटीश्रेयांसिमह्यं
प्रददातुदेवः॥ रक्तांबरोरक्तवपुःकिरीटीचतुर्भुजोदेवगुरुःप्रशांतः। दधातिदंडंचकमंडलुंचतथाक्ष
सन्तह० ३२ सूत्रंवरदोस्तुमह्यं॥ नीलद्युतिःशूलधरःकिरीटीगृध्रस्थितस्त्रासकरोधनुष्मान्। चतुर्भुजःसूर्य
सुतःप्रशांतःसदास्तुमह्यंवरमंदगामी॥ नीलांबरोनीलवपुःकिरीटीकरालवक्त्रःकरवालशू
लीचतुर्भुजश्चर्मधरश्चराहुःसिंहासनस्थोवरदोस्तुमह्यं॥ धूम्रोद्विबाहुर्वरदोगदाभृद्गृध्रासन
स्थोविकृताननश्च। किरीटकेयूरविभूषितांगाःसदास्तुमेकेतुगणःप्रशांतः॥ एभिर्मंत्रैर्दानानि
दद्यात्॥ अत्रसुवर्णदक्षिणाशक्त्यावा॥ ॥इतिग्रहदानं॥ अथनानाधान्यादिद्रव्यमंत्राः॥ ॥
विधिस्तुहेमाद्रौव्रतखंडे॥ देयंतद्योजयेत्पूर्वंततोविप्रंचपूजयेत्॥ तत्तन्मंत्रैःप्रदद्याद्वैसर्वदा
५श्वेतांबरःश्वेतवपुःकिरीटीचतुर्भुजोदैत्यगुरुःप्रशांतः।तथाक्षसूत्रंचकमंडलुंचदंडंच
बिभ्रद्वरदोस्तुमह्यं॥५॥

दान० नेषयं विधिः॥ तत्रादौ तंडुलदानमंत्रः॥ पावनः सर्वयज्ञेषु प्रशस्ता होमकर्मणि॥ तस्मात्तंडुलदाने
२४ न प्रीयतां विश्वदेवताः॥ धान्यराजाश्च मांगल्याद्द्विजप्रीतिकरा यवाः। तस्मादेषां प्रदानेन मम मास्तु
भिमतं फलमिति यवदानं॥ ॥ गोधूममंत्रः॥ यस्मादन्नमया जंबूद्वीपे गोधूमसंभवः॥ गंधर्वसौ
ख्यधनदा अतः शांतिं प्रयच्छ मे॥ ॥ मुद्गमंत्रः। मुद्गबीजानि वै यस्मात्प्रियाणि परमेष्ठिनः। तस्मा
देषां प्रदानेन प्रीतिः सिध्यतु मे सदा॥ ॥ माषमंत्रः॥ यस्मान्मधुवने काले विष्णुदेहसमुद्भवाः॥ पितृतृ
प्तिकरा माषा अतः शांतिं प्रयच्छ मे॥ ॥ चणकमंत्रः॥ पुरा गोवर्धनोद्धारसमये हरिभक्षिताः॥ चणकाः
सर्वपापघ्ना अतः०॥ ॥ कुलत्थमंत्रः। अश्ववल्लीद्भवा नाम बलकीर्तिप्रवर्धनाः॥ कुलत्थाः सर्वपाप
घ्ना अतः०॥ ॥ तिलमंत्रः॥ तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः। तिलदानेन सर्वं मे पापं नाशय के
शव॥ स्वर्णतिलमंत्रः॥ तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः॥ विष्णुप्रीतिकरा नित्यमतः०॥ स
हिरण्यतिलपात्रस्य॥ तिलाः पुण्याः पवित्राश्च सर्वकामवराः शुभाः॥ शुक्लाश्चैव तथा कृष्णा विष्णु
गात्रसमुद्भवाः॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ तिलपात्रप्रदानेन तानि नश्यंतु मे सदा॥ राम०
अन्नस्य॥ अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः॥ अन्नं ब्रह्मा खिलत्राणं मस्तु मे जन्म जन्मनि॥ ॥ २४

दध्यन्नस्य॥ चंद्रमंडलमध्यस्थं चंद्राब्जसमप्रभं॥ दध्यन्नं तस्य दानेन प्रीयतां नामिनो मम॥ ॥
पायसान्नस्य॥ पायसं परमान्नं सर्वदानोत्तमोत्तमं॥ सर्वदेवतयोग्यं च श्रेयः पुष्टिं प्रयच्छतु॥ ॥
भक्ष्याणां॥ केशवप्रीतिदा भक्ष्याः शंभुब्रह्मार्कतुष्टिदाः॥ पृथग्विधापूपकाद्याः यच्छंति बलमौरसं॥ ॥
सक्तूनां॥ प्राजापत्याय ते प्रोक्ताः सक्तवो यज्ञकर्मसु। तस्मात्सक्तूनु प्रयच्छामि प्रीयतां मे प्रजापतिः
॥ ॥ दुग्धस्य॥ अलक्ष्मीमरणं नित्यं नित्यं सौभाग्यवर्धनं॥ क्षीरं मंगलमायुष्यमतः०॥ ॥ नवनीतस्य।
कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं शुभं॥ नवनीतं प्रदास्यामि बलं पुष्टिं वदेहि मे॥ ॥ आज्यस्य॥
कामधेनोः समुद्भूतं देवानामुत्तमं हविः॥ आयुर्विवर्धनं दातु राज्यं पातु सदैव मां॥ ॥ तैलस्य॥ तैलं तु
ष्टिकरं नित्यं आयुष्यं पापनाशनं॥ अमंगल्यहरं नित्यमतः शांतः०॥ ॥ शर्करायाः। अमृतस्य कुलो
त्पन्ना इक्षुधारा तु शर्करा॥ सूर्यप्रीतिकरा नित्यमतः शांतः०॥ ॥ गुडस्य॥ प्रणवः सर्ववेदानां ना
रीणां पार्वती यथा॥ तथा रसानां प्रवरः सदैवेक्षुरसो मतः॥ ॥ इक्षोः॥ इक्षुदंडं महापुण्यं रसाढ्यं सर्व
कामदं॥ तुभ्यं दास्यामि तेनाशु प्रीयतां परमेश्वरः॥ मधुनः॥ यस्मात्पितॄणां श्राद्धे संप्रीतं मधु मन्तो
द्भवं॥ तस्मात्तव प्रसादेन रक्ष मां दुःखसागरात्॥ ॥ गणेशप्रतिमादानं॥ यमामनंति देवेशं विश्व

Indira Gandhi National
Centre for the Arts

दान० नाथउमासुत॥ विघ्नेशरक्षप्रकुरुतुभ्यंदास्याम्यभीष्टदेन॥ ॥मुक्तादानं॥ ताम्रपर्ण्यर्णवोसन्नावर्ण्ण
३५ घा कल्पवर्णिताः॥ मुक्ताः शुक्त्युद्भवाःसंतुभुक्तिमुक्तिप्रदाभव॥ ॥तस्यमंत्रः॥ यथाभूमिप्रदा
नस्यकलांनार्हंतिषोडशीं॥ दानान्यन्यानिमेशांतिर्भूमिदानाद्भवत्विह॥ सर्वभूताश्रयाभूमिर्व
राहेणसमुद्धृता॥ अनंतसस्यफलदाअतः०॥ ॥पादुकयोः॥ कंटकोच्छिष्टपाषाणवृश्चिकादिनि
वारणे॥ पादुकेसंप्रदास्यामिविप्रप्रीत्यापरंत्वतां॥ ॥उपानहो॥ उपानहौप्रदास्यामिकंटका
दिनिवारणे॥ सर्वस्थानेषुसुखदाततःशांतिं०॥ ॥छत्रस्य॥ इहामुत्रातपत्राणंकुरुकेशवमेप्र
भो॥ छत्रंत्वत्प्रीतयेदत्तंब्राह्मणायमयाशुभं॥ ॥चामरस्य॥ शशांककरसदृशंहिमडिंडीरपांडु
रं॥ प्रोत्सार्याशुदुरितंचामराविरवल्लभ॥ व्यंजनस्य॥ पत्रिकासर्वजंतूनांश्रेयानंदकरीशुभा॥ पित्त
शांतिप्रदानित्यमतःशांतिं०॥ ॥दर्पणस्य॥ दर्शनेनत्वमादर्शनृणांमंगलदायक॥ शौर्यसौभाग्य
सत्कीर्तिर्निर्मलोज्ञानदोभव॥ कूष्मांडस्य॥ ब्रह्महत्यादिपापघ्नंब्रह्मणानिर्मितंपुरा॥ कूष्मां
डंबहुबीजाढ्यमतःशांतिं०॥ ॥सौभाग्ययुक्तशूर्पस्य॥ कंचुकीवस्त्रयुग्मेश्चतथाकर्णावतंस रास०
कैः॥ कंठसूत्रेश्चभूषाभिःप्रीयतांनिमिनंदिनी॥ ॥शूर्पस्य॥ रामपत्निमहाभागेपुण्यकीर्त्तिवि ३५

रामये॥ मद्दोषेमानिशूर्पाणिमयादत्तानिजानकि॥ ॥पर्वणिसंक्रांतौचसर्वत्रदानंतशक्त्याद
शदानानिकार्याणि॥ ॥इतिदशदानानि॥ उमामहेश्वरस्यप्रतिमादाने॥ ॥शिवशक्त्यादिकंमस्मा
जगदेतच्चराचरं॥ तस्माद्दानेनसर्वंमेकरोतुभगवान्शिवः॥ कैलासवासीगौरीशोभगवान्भगने
त्रभित्॥ चराचरात्मकोलिंगरूपीदिशतुवांछितं॥ ॥लिंगस्य॥ इदंमारकृतंलिंगरौप्यपीठसमन्वितं॥
धान्यैर्द्वादशभिर्युक्तमेकादशपलान्वितं॥ संप्रदद्याद्विधानेनयथोक्तंफलमश्नुते॥ काश्मीरलिंगपक्षे
इदंकाश्मीरजमिति॥ ॥शिवनामस्य॥ महाकोशनिवासस्त्वंमहादेवोमहेश्वरः॥ प्रीयतांतवदानेनततः
शांतिं०॥ ॥व्यतीपातस्य॥ शंकुकर्णप्रलंबोष्ठलंबभ्रूदीर्घनासिक॥ अष्टनेत्रचतुर्वक्त्रविस्तीर्णश
तयोजन॥ व्यतीपातनमस्तेस्तुसोमसूर्यसुतप्रभो॥ यद्दानादिकृतंकिंचित्तदक्षय्यमिहास्तुमे॥
अथाश्वत्थसेवने॥ भविष्ये॥ उदकुंभप्रदानेपिह्यशक्तोयः पुमान्भवेत्॥ तेनाश्वत्थतरोर्मूलेसेव्यं
नित्यंजितात्मना॥ सर्वपापप्रशमनंसर्वदुःखप्रनाशनं॥ सर्वरोगप्रशमनंनित्यसंततिवर्धनं॥
अश्वत्थरूपीभगवान्प्रीयतांमेजनार्दनः॥ इत्युच्चार्यनमस्कृत्य०॥ यःकरोतितरोर्मूलेसकेमा
सचतुष्टयं॥ सोपितत्फलमाप्नोतिश्रीतिरेषासनातनीति॥ मासचतुष्टयेचैत्रादिके॥ इत्यलयं

२४९८

दान० २६ यविस्तरभीतेः॥ ॥इतिपदवाक्यप्रमाणज्ञश्रीभट्टोजीदीक्षितसूरेः सूनुनाभानुदीक्षितविरचि
तो दानविवेकः समाप्तः॥ छ॥ ॥शिवार्पणमस्तु॥ ॥शुभंभवतु॥ ॥श्री॥ ॥
पाठकवीरभद्रात्मजेन मह्लानंदेन लिखापितोकाशी

| | | |
|---|---|---|
| ३५६ अन्नस्य | ३५ गणेशप्रतिमा | ३५ शूर्पस्य |
| पयसान्नस्य | मुक्ता | ३६ उमामाहे |
| भक्ष्याणी | सस्यभूमेः | श्वरप्रतिमा |
| सक्तूनां | पादुकयोः | लिंगस्य |
| दुग्धस्य | उपानहौ | शिवनाभस्य |
| नवनीतस्य | छत्रस्य | व्यतिपातस्य |
| आज्यस्य | चामरस्य | अश्वत्थसेवने |
| तैलस्य | वीजनस्य | |
| [illegible] राया | दर्पणस्य | |
| गुडस्य | कूष्माण्डस्य | |
| इक्षोः | सौभाग्यपुत्रकप्र | |
| मधुनः | दस्य | |

दान० २६